४. 2c सर्ववास्तुक्रियाकाले] A, सर्ववास्तुक्रियाकालं C, D, एतत्प्रासादकायां तु F^1, तप्रासादकायां तत् (?) F^2, जीवं वास्तुक्रियाकालं G.

५. 3b सर्वगर्भशमित्रयम्] A, सर्वत्र च शमीत्रयं C, D, G, गर्भं न्यंशति च ध्रुवम् F. Lire स गर्भं समीरितम् ?

६. F^1 et F^2 omettent 3cd.

७. 3d न्यस्तव्याः प्रथमेष्टकाः] D, G, कर्तव्यं प्रथमेष्टके A, C.

८. C^2 omet 4cd.

९. 4c प्रतिबन्धे तु यद्धर्म्ये] A, D^2, प्रतिबन्धं तु यद्धर्म्यं C^1, D^1, F^1, प्रतिबन्धन्तु वर्धत्य F^2, वृतिबन्धं तु तद्धर्म्यं G ; 4d वृतेरु°] A, C, D, F^1, G(var.), व्रतेरु° A, F^2, प्रतेरु° G.

१०. A^2 omet 5ab-6ab ; F^1 et F^2 ajoutent entre 4d et 5a : प्रतेरुपरि विन्यस्य ब्राह्मणानां विशेषतः । विप्रोपरि (pour वप्रोपरि) नृपस्योक्तं उपाने वैश्यशूद्रकम्॥

११. 5a सर्वेषां भूगतं] A^1, F, सर्वेषां त्रिशतं C, D^1, सर्वेषां भ्रं शतं (?) D^2, सनष्टाण्त्रिगतं G ; 5b °करं परम्] A^1(etc.), °कराय च F.

१२. 5d ऽथवा] A^1, C, D^1, G, तथा D^2, F.

१३. F^1 et F^2 remplacent 6ab par : ज्ञात्वा पूर्वोक्तवद्धीमान्सर्वलक्षणसंयुतम्।

१४. 6a पाकशालापुष्पशाला] C^2, महासे पुष्पशालायां A^1, महानसे पुष्पशालायाम् (*v.f.*)

प्रासादस्य तु यद्गर्भं तत्स्थानं वक्ष्यतेऽधुना[१] ॥ ६ ॥
द्वारदक्षिणपार्श्वस्थस्तम्भमूले तु विन्यसेत्[२] ।
कवाटार्गलयोगे वा विन्यसेत्तु विशेषतः[३] ॥ ७ ॥

[३. फेलालक्षणम्]

[३.१. फेलाद्रव्यम्]

[४]सौवर्णे राजते वापि ताम्रे वा कांस्यकेऽपि वा[५] ।
अथवा संभवद्द्रव्यैः कारयेद्गर्भभाजनम्[६] ॥ ८ ॥

[३.२. फेलामानम्]

भाजनस्य तु विस्तारं पञ्चधा परिकीर्तितम्।
हस्तं वापि वितस्तिं वा दश वाष्टाङ्गुलं तु वा[७] ॥ ९ ॥
स्तम्भविस्तारमानं वा उत्सेधं तावदेव तु[८] ।

[३.३. फेलाकृतिः]

वृत्तं वा चतुरश्रं वा गर्भफेलां तु कारयेत्[९] ॥ १० ॥
[१०]फेलोत्सेधं त्रिधा कृत्वा द्विभागं भाजनं भवेत्।
भागं पिधानमेवं स्याद्यवमानं त्रिविस्तृतम्[११] ॥ ११ ॥
पञ्चविंशतिकोष्ठानि फेलामध्ये प्रकल्पयेत्।

C[1], D, G ; 6b °स्वापस्थानेषु] C[2], °शय्यास्थानेषु A[1], °नयनथानेषु C[1], °शयनस्थानेषु D, G.

१. 6d तत्स्थानं] C[1], D, F, G, स्थापनं A, तत्स्थाने C[2] ; °तेऽधुना] A(etc.), °ते पुनः F[1].

२. 7a °दक्षिणपार्श्वस्थ°] A, °प्रदक्षिणस्तम्भं C, G, °प्रदक्षिणस्थ° D, °प्रदक्षिणे स्थाने F.

३. 7d विन्यसेत्तु विशेषतः] A, C[2], D, G, न्यस्तव्यं गर्भभाजनम् F.

४. Dans C[1] lacune correspondant à 8b-9b.

५. 8b कांस्यकेऽपि वा] A, C[2], D, G, काम्स्यकैरपि F.

६. 8c अथवा संभवद्°] A[1], अथवा संभ° (?) A[2], यथावा संभव° C[2], D, G, यथा संभवतद्° F[1], यथा संभवतं F[2].

७. 9c हस्तं वापि वितस्तिं] A, C(?), D, G, हस्तवापि हस्तर्वा F[1], हस्तावपि वितस्तिर् F[2] ; 9d दश वाष्टाङ्गुलं तु वा] Eds., द्वादशाष्टाङ्गुलं तु वा A, C(?), D[2], G, सप्ताङ्गुलषडङ्गुलम् F.

८. 10a वा] A, C[2], D, F[2], G, स्याद् F[1].

९. 10d °फेलां तु कारयेत्] A, D, G, °बेरं तु कारयेत् C[2], °वेलाकृतिर्भवेत् F.

१०. Dans C[1] 11b-12c est remplacé par une longue incise extraite d'un chapitre traitant d'un bain à mille vases qui ne semble pas appartenir au *Dīptāgama*).

११. 11c स्याद्°] A, D, वा F ; 11d यवमानं त्रि°] A[1], वामनं भित्ति° F[2], भावनं भक्ति° F[1], यद्मानं भित्ति° C[2], D, यवमानं भित्ति° (*v.f.*) A[2].

[४. गर्भाङ्गानि]

[४.१. अक्षरादिन्यासः]

मध्यकोष्ठे न्यसेत्कूटं बिन्दुनादसमायुतम्[१] ॥ १२ ॥
पूर्वाद्यष्टसु कोष्ठेषु यकाराद्यष्टकं न्यसेत्[२] ।
प्रागादिषोडशकोष्ठेषु स्वरान्षोडश विन्यसेत्[३] ॥ १३ ॥
रत्नलोहायुधान् धातून्फेलामध्ये तु विन्यसेत्[४] ।
[५]मृत्कन्दबीजसर्वांश्च गर्भगर्ते तु विन्यसेत्[६] ॥ १४ ॥

[४.२. रत्नन्यासः]

[७]फेलाशुद्धिं ततः कृत्वा रत्नं मन्त्रैर्विनिक्षिपेत्[८] ।
माणिक्यं विन्यसेत्कूटे तन्मन्त्रेणैव देशिकः[९] ॥ १५ ॥
आकारे तु न्यसेद्वज्रमीकारे मौक्तिकं न्यसेत्[१०] ।
महेन्द्रनीलं ह्यूकारे ऋकारे स्फटिकं न्यसेत्[११] ॥ १६ ॥

---

१. 12c मध्यकोष्ठे न्यसेत्] SNB., त्रिकोष्ठमष्टमं A[1], lacune A[2], C[2], D, G, मध्ये कोष्ठं न्यसेत् F[1], मध्यकोष्ठं न्यसेत् F[2] ; 12d बिन्दुनादसमायुतम्] A[1], बिन्दुनादसमन्वितम् C, D, F[1], G, बीजनादसमन्वितम् F[2].

२. 13a पूर्वाद्यष्टसु कोष्ठेषु] A, C[2], पूर्वाद्यष्टसु कोणेषु C[1], पूर्वद्यष्टकोष्ठेषु D, तत्पूर्वाद्यष्टकोणेषु F , पूर्वाद्यष्टककोणेषु G, पूर्वाद्यष्टककोष्ठेषु G(var.); 13b यकाराद्यष्टकं] SNB. अकाराद्यष्टकं A, D[2], F[2], अङ्गनाद्यष्ट C, D[1], G.

३. 13c प्रागादि] F अकारा A[1], अकारादि (?) A[2], अङ्गादि C, D, G ; सोडशकोष्ठेषु] (*v.f.*) D[1], सोडशे कोष्ठे A(etc.) ; 13d स्वरान्षोडश विन्यसेत्] F, षोडशं विन्यसेद्बुधः A, विद्वान्षोडशविन्यसेत् C, D, G.

४. 14a °लोहायुधान् धातून्] D[1], °लोहायुता धातून् A[1], °लोहायुता धातुं A[2], °लोहायुधं ++त्वात् C[1], °लोहायुधं कृत्वा C[2], °लोभायुता त्वातृन् D[2], °लोभायुतान् धातृन् F[1], °लोहायुतान् धातृन् F[2], °लोहौषधी(?) G.

५. C[2] omet 14cd.

६. 14c मृत्कन्दबीज°] A, मृत्स्कन्धान्यान् C[1], G, D, मृगं दधन्द्यां F[1], मुद्गन्तु धान्यां F[2] ; 14d गर्भगर्ते] A[2], F, गर्भे गर्भे A[1], गर्भगेहे C[1], D[1], G, गर्त गत्वे D[2].

७. A[1] place après 14b le texte de 16cd-17ab (qu'il donne également à son emplacement correct) ; C[1] : lacune correspondant à 15b-16d.

८. 15b रत्नं मन्त्रैर्विनिक्षिपेत्] A, D, रत्नं मन्त्रेषु निक्षिपेत् C[2], तन्मन्त्रेणैव निक्षिपेत् F, lacune G.

९. 15d तन्मन्त्रेणैव] A, D[1], तत्तन्मन्त्रेण C[2], D[2], G.

१०. 16a आकारे] A, C[2], D, G, आकारा F ; 16b ईकारे] A, D, F, G, ककारे C[2] ; मौक्तिकं न्यसेत्] A, C[2], D, G, मौक्ति विन्यसेत् F.

११. 16c °न्द्रनीलम् ह्यूकारे] Eds., °न्द्रनीलम् ऌकारेA[1], °न्द्रनीलमूकारे A[2], °न्द्रे नीलमाकारे C, G, °न्द्रनीलमाकारे D, °एन्द्रनीलमूकारे F ; 16d ऋकारे स्फटिकं न्यसेत्]

ऌकारे विन्यसेन्नीलमैकारे पुष्यरागकम्[१] ।
औकारे तु प्रवालं स्याद् अःकारे तु विडूर्यकम्[२] ॥ १७ ॥

[४.३. गजादिन्यासः]

सौवर्णेन गजं कृत्वा आकारे विन्यसेद्बुधः[३] ।
[४]राजतेन कपालं स्याद् ईकारे विन्यसेद्बुधः[५] ॥ १८ ॥
ताम्रेण कारयेत्कूर्मम् ऊकारे योज्य मन्त्रतः[६] ।

[४.४. आयुधन्यासः]

[७]आरकूटेन खट्वाङ्गम् ॠकारे विन्यसेद्बुधः[८] ॥ १९ ॥
भ्रमकेन पिनाकं स्याद्विन्यसेत्तु ॡकारके[९] ।
वैकृन्तकेन परशुं कृत्वैकारे तु विन्यसेत्[१०] ॥ २० ॥
[११]औकारे योज्य हरिणं कांसीयकमयं पुरः[१२] ।

SNB., एकरे स्फटिकं न्यसेत् A, व्योमाकारे स्फटिकं न्यसेत् C^1, D, G, स्फटिकं व्योम्नि विन्यसेत् C^2, औकार स्फटिकं न्यसेत् F.

१. 17a ऌकारे] SNB., माकारे A^1(etc.) ; नीलं] A, शैलं C, D, G, शङ्खं F ; 17b ऐकारे] SNB., व्यूकारे A, वकारे C, D, G, व्यागारे F.

२. 17c औकारे तु प्रवालं] SNB., ओकारे तु प्रवालं A, lacune C^1, विरागे पुष्यरागं C^2, विकारे पुष्यरागं D, G, फकारे रूह्यकान्तं F^1, पीकारे रूह्यकान्तं F^2 ; 17d अःकारे तु विडूर्यकम्] SNB., एकारे तु विडूर्यकम् A, यकारं तु विधूरकम् C^1, D^2, यकारं तु विदूरकम् C^2, यकारे तु विशूरकम् D^1, G, नैकारे वैडूर्यं विदुः F^1, नैकारे वैडूर्यकं भवेत् F^2.

३. 18b आकारे] A, C, D, G, आवि(?) F.

४. C^1 et C^2 omettent 18cd ; A^2 omet 18cd-19cd.

५. 18d °दीकारे] Eds., °दिकारे A^1, F, °द्यकारे D, °धकारे G ; बुधः] A^1, D^2, क्रमात् D^1, F, G.

६. 19a ऊकारे] A^1, कारयेद् C, मकारे D^1, G, यूकारे F.

७. Dans C^1 lacune correspondant à 19d-20d.

८. 19d ॠकारे] Eds., ऋकारे A^1, D^2, G(var.), जकारे C^2, G, भकारे D^1, एकारे F ; विन्यसेद्बुधाः] A^1, D, G, त्रपु विन्यसेत् F.

९. 20a भ्रमकेन पिनाकं] A, भूमेशं विनाङ्गं C^2, आमकेन पिनाकं D^1, भुमकेन पिनाकं D^2, अग्रकेन पितानं F^1, अग्रकेन विनंशं F^2, lacune G ; 20b ॡकारके] SNB., ऋकारके A, D^2, रगारके C^2, G, मकारके F.

१०. 20c वैकृन्तकेन] Eds., वैकतन्तेन A^1, वैकतेन A^2, F^2, वैकृतं तेन C^2, D^2, G, वैक्रान्तकेण D^1, F^1 ; 20d कृत्वैकारे] A^1, C^2, D, G, व्योकारेण F.

११. F^1 et F^2 remplacent 21ab par : विकारयोगपरिणं सिन्धकाममयं बुधः। (F^2 : सीसकामम्बुजं बुधः).

१२. 21a औकारे] Eds., ओकारे A, D, G, ओङ्कारे C ; हरिणं] SNB., किरणं A, C, G, D ; 21b कांसीयकमयं पुरः] Eds., काङ्गस्यकमयं पुरः A, कासीसकर्मयं पुनः C, D, मकारे

आयसेन कृतं शूलम् अःकारे स्थाप्य देशिकः[१] ॥ २१ ॥
कृत्वा जाम्बूनदेनोक्षं कूटे निक्षिप्य मन्त्रतः[२] ।
एवं विन्यस्य बहुधा धातवो विन्यसेद्बुधः[३] ॥ २२ ॥

[४.५. धातुन्यासः]

आकारे विन्यसेत्श्याममम् ईकारे तु मनश्शिलाम्[४] ।
[५]ऊकारे सीसकं न्यस्य ॠकारे गां च विन्यसेत्[६] ॥ २३ ॥
[७]सौराष्ट्रं चैव ऌकारे ऐकारे वाजिनं न्यसेत्[८] ।
औकारे रोचना प्रोक्ता अःकारे हरितालकम्[९] ॥ २४ ॥

[५. फेलाधिवासः]

[१०]प्रासादस्योत्तरे पार्श्वे प्रपां कृत्वा विशेषतः ।
तन्मध्ये स्थण्डिलं कृत्वा शालिभिश्चतुरश्रकम्[११] ॥ २५ ॥
गन्धपुष्पादिना पूज्य गर्भफेलां तु विन्यसेत् ।

सीसकं बुधः G.

१. 21c आयसेन कृतं] C, A^2, D, G, आयसेन तु तं A^1, आयतेन कृतं F ; 21d अःकारे] SNB., मकारे A, अकारे C, D^1, तेनाकारे (*v.f.*) F^2, + कारे G.

२. 22a कृत्वा जाम्बूनदेनोक्षं] A, C, D, G, जाम्बुनदमयं चोक्षं F.

३. 22c बहुधा] A, C^1, D, F^2, G, जुहुयात् F^1 ; 22d धातवो विन्यसेत्बुधः] A, D^1, धातवो विन्यसेत्पुनः C, D^2, G, पश्चाद्विन्यस्य धावतः F.

४. 23a आकारे विन्यसेत्श्याममम्] A, D, F, आकारे विन्यसेच्छीमान् C, कूटारे विन्यसेच्छामम् G ; 23b ईकारे] C, D^2, F^2, G, इकारे A^1, D^1, F^1, विकारे A^2 ; तु मनश्शिलाम्] Eds. तु मनश्शिला A^1, ते मनश्शिला A^2, तु मनश्शिलः F.

५. C^1 : lacune correspondant à 23d-25a.

६. 23c ऊकरे सीसकं न्यस्य] D, उकारे सीसकं न्यस्य A, ऊकारे सीसंविन्यस्य C^1, ऊकारे सीसविन्यस्यं C^2, एकारे सिसमकं प्रोक्तं F^1, ऊकारे सीसकं प्रोक्तं F^2, ऊकारे विन्यस्य सीसं G ; 23d ॠकारे गां च विन्यसेत्] Eds., ॠकारे गोश्च विन्यसेत्] A^2, ऋकारे गोश्च विन्यसेत् A^1, D, G, ऋकारे गां च विन्यसेत् C^2, होकारे हैरिकं न्यसेत् F^2, व्याकारे परिविन्यसेत् F^1.

७. F^1 et F^2 remplacent 24ab-24cd par : मकारे सौराष्ट्रकं चैव व्याकारेणाञ्जनं भवेत्। विकारे (F^2 : षिकारे) रेचना प्रोक्ता नेकारे हरितालकम्।

८. 24a चैव ऌकारे] A(?), D(?), चैर्ॠ(?) ओङ्कार C^2, चैव ऋकारे G ; 24b ऐकारे वाजिनं] D, एकारे वाजिनं A, C^2, ऐकारे व्यञ्जनाम् G.

९. 24d अःकारे] A^2, हःकारे A^1, मकारे C^2, D, G.

१०. F^1 et F^2 développent les vers 25-27 : intercalant de nombreux demi-vers supplémentaires, ils omettent 27cd et ajoutent onze demi-vers entre 27ab et 28ab ; voir p.68 l'appendice à ce chapitre.

११. 25d शालिभिश्चतुरश्रकम्] A^2, शालिश्च चतुरश्रकम् A^1, G, शालिभिश्चतुरङ्गुलम् C, D.

कौतुकं वन्धयेत्तस्मिन्नववस्त्रेण वेष्टयेत्[१] ॥ २६ ॥
परितः प्रक्षिपेद्वीजान्तण्डुलेन समन्वितान्[२] ।
[३]महाव्याहृतिमन्त्रेण होमं कुर्याद्विशेषतः ॥ २७ ॥
प्रभाते सुमुहूर्ते च लग्ने निक्षिप्य मन्त्रतः[४] ।
निधीन्निक्षिप्य मन्त्रेण परितोऽपि द्वीपान्क्षिपेत्[५] ॥ २८ ॥

[६. दक्षिणा]

आचार्यं पूजयेत्तत्र वस्त्रहेमाङ्गुलीयकैः ।
शिल्पिनं पूजयेत्पश्चाद्धेमकुण्डलसंयुतम् ॥ २९ ॥

[७. गर्भविन्यासः]

[६]अष्टधा विभजेद्भित्तिं वाह्यांशाद्यतुरं त्यजेत्[७] ।
त्रीणि चाभ्यन्तरे त्यज्य मध्यैकांशे निधापयेत्[८] ॥ ३० ॥

[७.१. मृन्न्यासः]

मृन्नदीसस्यवल्मीककुलीरावटसंस्थिता[९] ।
[१०]नागदन्तं वृषशृङ्गमद्रिसागरमृच्छुभम्[११] ॥ ३१ ॥

---

१. 26d °नव°] A, C^2, D^1, G, °अन्य° C^1.

२. 27a प्रक्षिपेद्] C^2, परिश्रवेद् (*v.f.*) A, C^1, G, परिस्तरेत् D ; बीजान्] C^1, D, G, बीजं A, C^2 ; 27b समन्वितान्] C^1, G, समन्वितम् A, C^2, D.

३. Dans C^1 lacune de 27d à 28c.

४. 28b लग्ने निक्षिप्य मन्त्रतः] A, सुलग्ने सुमुहूर्तके C^2, सुलग्ने च विराजिते D^1, lacune D^2, सुलग्ने क्षिपमन्त्रतः F, सुलग्ने +++++ G.

५. 28c निधीन्निक्षिप्य] Eds., निधि निक्षिप्य A^1, निशि निक्षिप्य A^2, F^2, लग्ने निक्षिप्य C^2, + + निक्षिप्य G, D(?) ; 28d परितोऽपि द्वीपान्निक्षिपेत्] Eds., परितोऽपि दिवा निक्षिपेत् A^1(etc.), त्वरिदेवान्दिवा क्षिपेत् F.

६. 4.30 = 12.21cd-22ab.

७. 30a भित्तिं] A^2, C, D, G, भक्तिं A^1 ; 30b वाह्यांशाद्यतुरं त्यजेत्] A^2, वाह्यांशाद्यतुरं भवेत् A^1, वाह्याभ्यश्चरं त्यजेत् C^1, वाह्ये चाभ्यन्तरे न्यसेत् C^2, वाह्याभ्यन्तरं त्यजेत् D, वाह्यताद्यापि विन्यसेत् F, वान्याद्यश्चरं त्यजेत् G.

८. 30c चाभ्यन्तरे] A, D^1, G, वाभ्यन्तरे C, न्याभ्यान्तरं D.

९. 31a मृन्नदी°] A^1, मृनेन्द्री° A^2, हृन्नदी° C, D, G, भृनदी° F^1, भूनदी° F^2 ; °सस्य°] F, यस्य A, C, D, G ; °वल्मीक°] C^1, D, F, G(var.), °पद्मश्च A^1, °वत्म° A^2, °वल्मीकं C^2, G ; 31b °वटसंस्थिता] SNB., °राच पटस्थलम् A^1, °वटस्थलम् (*v.f.*) A^2, °रावद्दवस्थलः C^1, °रावदवस्थलम् C^2, °रवद्दलस्थलम् D, °रवासमलस्थिता F^1, °रवासफलस्थितः F^2, °रापद्दलस्थलम् G.

१०. C^1 omet 31cd-32ab.

११. 31d °द्रिसागरमृच्छुभम्] D(?), °द्रिसागरजापहम् A °दिरामृच्छुभम् (?) C^2, °ष्टमृद्गह्य

तद्गर्भगर्तमापूर्य तस्योर्ध्वे कन्दकान्न्यसेत्[१] ।

[७.२. कन्दन्यासः]

मध्यमेऽम्बुजकन्दं स्यात्पूर्वे कुमुदकन्दकम्[२] ॥ ३२ ॥
दक्षिणे चोत्पलकन्दं सौगन्धीं पश्चिमे न्यसेत्[३] ।
[४]ईशे कन्दं न्यसेत्सौम्ये बीजान्युपरि विन्यसेत्[५] ॥ ३३ ॥

[७.३. बीजन्यासः]

[६]पूर्वे तु विन्यसेच्छालीन्दक्षिणे व्रीहिकान्न्यसेत्।
पश्चिमे कोद्रवं न्यस्य उत्तरे माषबीजकम्[७] ॥ ३४ ॥
पावके विन्यसेन्मुद्गं नैर्ऋत्यां कङ्कुबीजकम्[८] ।
[९]प्रियङ्गुं वायुदिग्भागे ऐशान्यां तु कुलुत्थकान्[१०] ॥ ३५ ॥

[७.४. फेलान्यासः]

एवं न्यस्त्वा विधानेन विन्यसेद्गर्भमुत्तमम्[११] ।
सर्वातोद्यसमायुक्तं सर्वघोषसमायुतम्॥ ३६ ॥
[१२]ततो मुहूर्तमन्वीक्ष्य गर्भं सम्यङ्निधापयेत्॥ ३७ ॥

॥ इति श्रीदीप्तागमे प्रतिष्ठातन्त्रे गर्भविन्यासपटलः [चतुर्थः] [१३] ॥

देशिकः F, °द्रिवासारमृत्शुभम् G.

१. 32b कन्दकान्] D, कान्तकान् A, G, कन्ददम् C^{2}, कन्दरा F.

२. 32d °कन्दकम्] C, D, G, °कन्दरम् A^{1}, F^{1}, °कन्तरम् A^{2}, °मूलकम् F^{2}.

३. 33a दक्षिणे चोत्पलकन्दं] SNB., दक्षिणोत्पलकन्दं (*v.f.*) A, C^{2}, D, G, F, दक्षिणे पलकन्दं (*v.f.*) C^{1}.

४. F^{1} et F^{2} remplacent 33cd par : सौम्ये तु शेरिस्कन्दां तु बीजान्योन्यं परिविन्यसेत्।

५. 33c सौम्ये] A, D, G, lacune C^{1}, मध्ये C^{2} ; 33d बीजान्युपरि विन्यसेत्] A, बीजं स्यात्फलविन्यसेत्, बीजास्युत्पलविन्यसेत् C^{1}, G, बीजान्युत्पलविन्यसेत् D.

६. C et G omettent 34ab.

७. 34c कोद्रवं न्यस्य] D^{1}, कौद्रकान्न्यस्त्वा A, कौद्रविन्यासम् C, G, कौतुकं न्यस्य D^{2}, कोद्रवम्न्यस्त्वा F^{2}.

८. 35b कङ्कु°] SNB., गक्रु° A^{1}, लकु° A^{2}, ककु° C^{1}, D, कर्तृ° C^{2}, त्रम्कु° F, कु + G.

९. C^{1} : lacune correspondant à 35d-37a.

१०. 35c वायु°] A, D^{1}, G, वर° C^{2} ; 35d कुलुत्थकान्] A^{1}, D^{1}, कुलस्थकम् A^{2}, D^{2}, F, कुलस्थलम् C^{2}.

११. 36a न्यस्त्वा] A, C^{1}, F^{1}, न्यासं C^{2}, D, G.

१२. F^{1} et F^{2} ajoutent entre 36cd et 37 : जयशब्दसमायुक्तं ब्रह्मघोषसमन्वितम्। puis entre 37 et le colophon : ततो गन्धादिनाभ्यर्च्य दिग्देवानां बलिं ददेत्। गर्भन्यासमिदं प्रोक्तं पादवर्ग अथ श्रृणु॥

१३. A^{2}, D : इति दीप्तशास्त्रे प्रतिष्ठातन्त्रे गर्भविन्यासपटलः पञ्चमः ; C, G : इति दीप्तशास्त्रे

Appendice au chapitre 4

Développement des vers 25-27 dans les manuscrits F^1 et F^2.

[फेलाधिवासः]

[१]प्रासादस्योत्तरे पार्श्वे प्रासादाग्रेऽथवा पुनः।
प्रपां कृत्वा विशेषेण सप्तपञ्चकरेण च[२] ॥ अनु॰१ ॥
दर्भमालासमायुक्तं चतुस्तोरणभूषितम्।
वितानध्वजसम्युक्तं मुक्तादामैरलङ्कृतम् [३] ॥ अनु॰२ ॥
[४]तन्मध्ये स्थण्डिलं कृत्वा शालिभिश्चतुरङ्गुलम्।
तिलतण्डुलसंयुक्तं लाजदर्भसमन्वितम्॥ अनु॰३ ॥
गन्धपुष्पादिना पूज्य दिग्देवान्स्वस्वमन्त्रतः[५] ।
गर्भफेलां न्यसेद्धीमान्स्थण्डिलोपरि सुस्थिताम्॥ अनु॰४ ॥
[६]कौतुकं बन्धयेत्तस्मिन्नववस्त्रेण वेष्टयेत्।
परितः परितो बीजान्सप्तद्वीपाकृतिं स्मृतम्[७] ॥ अनु॰५ ॥
यवनीवारवरकं प्रियङ्गुस्तिलसर्षपम्।
मुद्गानि सप्त बीजानि द्वीपाकाराणि कल्पयेत्॥ अनु॰६ ॥
[८]बीजान्तरे न्यसेद्धीमान्तण्डुलान्शालिसम्भवान्।
सप्तार्णवमिति ज्ञेयं तिलदर्भैः परिस्तरेत्॥ अनु॰७ ॥
गन्धादिभि(स) समभ्यर्च्य सप्तम + वा + क्रमात्[९]।
होमं कुर्याच्चतुर्दिक्षु कुण्डे वा स्थण्डिलेऽपि वा ॥ अनु॰८ ॥
समिदाज्यचरून्लाजान्तिलसर्षपसाक्षतान्[१०]।
होमयेच्च तदर्धार्धं तस्यार्धं वा विशेषतः[११] ॥ अनु॰९ ॥

महातन्त्रे गर्भन्यासविधिः चतुर्थः पटलः ; F : इति दीप्तशास्त्रे प्रतिष्ठायां गर्भन्यासः पञ्चमः।

१. Voir ci-dessus 25a.

२. anu.1d च] F^1, वा F^2.

३. anu.2c युक्तं] F^1, युक्ता F^2.

४. Voir ci-dessus 25cd.

५. anu.4b दिग्देवान्] Eds., दिपेदान् F^1, द्विवेदान् F^2.

६. Voir ci-dessus 26cd.

७. anu.5d °कृतिं स्मृतम्] F^1, °कृतिस्मृतिः F^2.

८. F^1 omet anu.7ab.

९. anu.8b सप्तम् + वा + F^1, सप्तर्त वा (?) F^2.

१०. anu.9a चरून्ला° F^1, चरुं ला° F^2.

११. 9d lacune F^1.

शिवाङ्गैर्जुहुयाद्धीमान् ईशानेनाक्षतं हुनेत्[१] ।
वेदादिश्च ततो हुत्वा त्र्यम्बकेनैव होमयेत्॥ अनु°१० ॥
जयादिरभ्याधानं च होमं स्विष्टान्तमाचरेत्[२] ॥ अनु°११ ॥

[॥ अनुबन्धः समाप्तः ॥]

१. anu.10b ईशानेनाक्षतं] F², नीलानेनक्षतं F¹.

२. 11b होमं स्विष्टान्तं] F², स्विष्टोक्तं होमम् F¹.

[पञ्चमः पटलः]
[पादवर्गलक्षणम्][१]

अतः परं प्रवक्ष्यामि स्तम्भानां लक्षणं परम्।

[१. पादमानम्]

[१.१. अधिष्ठानवशान्मानम्]

अधिष्ठानोपरि स्तम्भं ह्युत्सेधं तु प्रवक्ष्यते[२] ॥ १ ॥
अधिष्ठानोत्सेधमानं द्विगुणं पाददैर्घ्यकम्[३] ।
[४]यस्य पादस्य चोत्सेधं सप्ताष्टनवभाजितम्[५] ॥ २ ॥
एकभागं भवेत्तत्र तस्य भागं तु विस्तृतम्[६] ।
तच्चतुर्भागहीनं वा त्रिभागं द्वयमेव वा[७] ॥ ३ ॥
भित्तिपादस्य विस्तारं प्रासादस्य वशानुगम्[८] ।

[१.२. हस्तसङ्ख्यामानम्]

महतो हस्तमात्रेण वक्ष्यते विधिनाधुना[९] ॥ ४ ॥
सवितस्त्यष्टहस्तेन स्तम्भायामं प्रकल्पयेत्[१०] ।
[११]एवं द्वादशभूमौ तु आदौ स्तम्भान्प्रकल्पयेत्[१२] ॥ ५ ॥

---

१. Manuscrits utilisés : A^1, A^2, C^1, C^2, D^1, D^2, F^1, F^2, G.

२. 1d ह्युत्सेधं तु प्रवक्ष्यते] D^1, अभ्युत्सेधश्च वक्ष्यते A^1, D^2, सिन्धूत्सेधः प्रवक्ष्यते C, बहूत्सेधाम्प्रवक्ष्यते A^2, lacune G, व्यासोत्सेधं विधीयते F.

३. 2a °मानं] C, G, °मानस्य A, D, (*v.f.*), °मानेन (*v.f.*) F, °मानं स्याद् (*v.f.*) G.

४. C^1 : lacune correspondant à 2c-3c.

५. 2c यस्य पादस्य चोत्सेधं] A, C^2, D, G, पादानां तु समुत्सेधं F.

६. 3a भवेत्] A, D^1, F, भजेत् C^2, D^2, G ; 3b तस्य भागं तु] A, तस्य भागस्य C^2, D, G, दारपादस्य F^1, दारुपादस्य F^2.

७. 3c °हीनं वा] A, D^2, °हीनं स्यात् C^2, D^1, F, G(var.) ; 3d त्रिभागं] G, त्रिभाग° A(etc.).

८. 4a भित्तिपादस्य] A^2, C, D, F^2, भक्तिपादस्य A^1, F^1, भित्तिविस्तारम् G ; 4b वशानुगम्] A, C, D, विशानकम् F^1, विनाशनम् F^2, च शानुकम् G.

९. 4c महतो हस्तमात्रेण] F^1, महतेस्तेन सङ्ख्येन A, महता हस्तसङ्ख्येन C, D^1, महते हस्तसङ्ख्येन D^2, G, महते हस्तमात्रेण F^2 ; 4d °धुना] A, D^2, F, G, lacune C^1, हुतम् C^2.

१०. 5a सवितस्त्यष्टहस्तेन] A^1, D^1(?), सर्पि तं त्र्यष्टहस्तेन C, सपीतं त्र्यष्टहस्तेन D^2, G, सवितस्तस्य हस्तेन F ; 5b स्तम्भायामं] A^1, C, D, F^2, G, स्तम्भं यामं A^2, समा यामं F^1.

११. F^1 omet 5d-7a.

१२. 5c एवं] A(etc.), एतद् F^1 ; 5d आदौ स्तम्भान्प्र°] C^2, आदिस्तम्भानि A, C^1, D, F^2,

द्वादशात्तु षडंशान्तं हीनं स्यात्तु तलं प्रति[१] ।
[२]अथ पादे नवाष्टांशभागैर्दशकमेव वा[३] ॥ ६ ॥
भूमौ तु चतुरंशं स्यात्पादानां प्रस्तरोन्नतम्[४] ।
अष्टाविंशत्यङ्गुल्यमादिपादस्य विस्तृतम्[५] ॥ ७ ॥
द्व्यङ्गुलं द्व्यङ्गुलं हीनमाद्वादशतलान्तकम्[६] ।
त्रिहस्तभवने पादं वैपुल्यं तु त्र्यङ्गुलम्[७] ॥ ८ ॥
त्रयोदशान्तभूमौ तु चाष्टमात्रं विधीयते[८] ।
चतुर्भागैकभागं वा तत्त्रिभागैकमेव वा॥ ९ ॥
स्तम्भानां निर्गमं प्रोक्तं नामानि शृणु चानल[९] ।

[२. पादभेदाः]

[२.१. ब्रह्मकान्तः, विष्णुकान्तः, रुद्रकान्तश्च]

स्तम्भायामं समस्तं तु चतुरश्रं सलक्षणम्[१०] ॥ १० ॥

आभिः स्तम्भानि G ; प्रकल्पयेत् A(etc.), प्रकल्प्यते F^2.

१. 6b हीनं स्यात्तु तलं] F^2, C^1, A^2, D, G, हीनस्या तु तलं A^1, हननं स्यात्तलं C^2.

२. C^1 : lacune correspondant à 6c-7d.

३. 6c पादे नवाष्टांश°] Eds., °वा पादनाष्टांशं A^1, °वा पादे नवाष्टांशं (*v.f.*) A^2, D, पादेन चाष्टांशं C^2, G, पादोदयाष्टांशं F^2 ; 6d °भागैर्दशकमेव] A^1, °भागैर्दशमेव A^2, °दशभागैकमेव C^2, D, F^2, G.

४. 7a तु चतुरंशम्] SNB., तु चतुरश्रं A, C^2, G, तु ++रश्रं D^1, भूमौ तुरश्रं D^2, भूमौ तु ह्रासं F^2 ; 7b पादानां प्रस्तरोन्नतम्] A(etc.), ह्रासस्यात्प्रस्ततोन्नतम् F^1, पादार्धं प्रस्तरोन्नतम् F^2.

५. 7c अष्टाविंशत्यङ्गुल्यम्] D^1, अष्टाविंशद्व्यङ्गुल्यम् A, D^2, G, अष्टाविंशद्विधम् + + C^2, अष्टाविंशत्तिदङ्गुल्यम् F^1, अष्टविंशद्विदङ्गुल्यम् F^2, अष्टविंशद्व्यङ्गुल्यम् G ; 7d विस्तृतम्] A, C^2, D, G, विस्मृतम् F.

६. 8a द्व्यङ्गुलं द्व्यङ्गुलं हीनं] A^1, C^1, D^2, G, F, द्व्यङ्गुलद्व्यङ्गुलं हीनं A^2, द्व्यङ्गुलं द्व्यङ्गुलहीनं C^2, द्व्यङ्गुलाभ्यङ्गुलं हीनं D^1.

७. 8c त्रिहस्तभवने पादं] SNB., त्रिहस्तपीवरे पादं A^1, त्रिहस्तं पीवरोदं A^2, त्रिहस्तं हि वने पादं C, D, G(var.), त्रिहस्तभवनोपादं F^1, त्रिहस्तं पवने पादं F^2, त्रिहस्तं हि वने पातं G ; 8d वैपुल्यं तु त्र्यङ्गुलम्] F, हस्ते मेम्बुलिमङ्गुलम् A^1, एषाङ्गुल्यो द्व्यङ्गुलम् C, D^2(?), G(?), एषां अङ्गुल्यद्व्यङ्गुलम् D^1.

८. 9b चाष्टमात्रं] F, तोष्टमांशाद् A^1, चाष्टमांशा A^2, lacune C^1, चाष्टम्यंशे C^2, D^2, चाष्टांशे D^1, G.

९. 10a निर्गमं प्रोक्तं] A, C^1(?), निर्ऋतिः प्रोक्ता C^2, D, निर्गतिं प्रोक्तं F, G(var.), °मन्तरं प्रोक्तं G ; 10b नामानि शृणु चानल] A^2, D, F, G, नमामि शृणु चानल A^1, नामाति शृणु चानलः C^1, नमाति शृणुत चानलम् C^2.

१०. 10c स्तम्भायामं समस्तं] SNB., स्तम्भायामसमस्तं A, सौहायतं समस्तं C^2, स्तम्भायतं

[१]सर्वावयवसंयुक्तं ब्रह्मकान्तमिति स्मृतम्।
मूले तत्कर्णमानेन चतुरश्रं तदूर्ध्वतः[२] ॥ ११ ॥
अष्टाश्रं कुम्भमण्डीभ्यां द्वाभ्यां वै विष्णुकान्तकम्[३] ।
अग्रादूर्ध्वे तु वृत्तं स्यात्कुम्भमण्डीसमन्वितम्[४] ॥ १२ ॥
रुद्रकान्तमिति ज्ञेयं

[२.२. सौम्यः, वासन्तिकः, शुण्डुपादश्च]

मूले दण्डप्रमाणतः।
चतुरश्रं तु वृत्तास्यं पादात्पादं विनिर्गतम्[५] ॥ १३ ॥
तदुपर्यग्रसीमान्तं षोडशाश्रसमन्वितम्।
[६]कुम्भमण्डीसमायुक्तं सौम्यमेतत्प्रशस्यते[७] ॥ १४ ॥
मूलप्रभृति चाष्टाश्रं केवलं कुम्भसंयुतम्[८] ।
वासन्तिकमिति ज्ञेयमग्राकारं सुवृत्तकम्[९] ॥ १५ ॥
केवलं कलशोपेतं शुण्डुपादमिति स्मृतम्[१०] ।

[२.३. पूर्वाग्रः, अष्टाश्रः, सुन्दरः, सिंहपादश्च]

मूलं यद्वा सकर्णेन चतुरश्रमतः परम्[११] ॥ १६ ॥
कलशेन सुवृत्तं यत्पूर्वाग्रस्तम्भमिष्यते[१२] ।

समस्तं D, F^2, G, स्तम्भावता सस्तेन्तु F^1.

१. C^1 : lacune correspondant à 11b-11d.

२. 11c तत्कर्णमानेन] A, तत्क्षणमात्रेण C^2, D, G, तत्कर्णमात्रेण F.

३. 12a कुम्भमण्डीभ्यां] C^2, D^2, F^2, कुम्भमण्डी स्याद् A, कुम्भमण्डिभ्यां C^1, कुमुदं विद्याद् D^1, कुण्डमण्डिभ्यां F^1, कुण्डमञ्चिभ्यां F^2.

४. 12c अग्रादूर्ध्वे] C, D, F^1, G, अश्रामूर्ध्वे A^1, F^2, अश्रमूर्ध्वे A^2.

५. 13c वृत्तास्यं] A, वृत्ताढ्यं C^2, D, मूलाढ्यं G, पकार्थं F^1, पद्मार्थं F^2 ; 13d पादात्पादं विनिर्गतम्] A, D^2, उत्पादात्पादनिर्गतम् C(?), पादाद्वादिविनिर्गतः F^1, उपानात्पादविनिर्गतम् G.

६. C^1 : lacune correspondant à 14d-16a.

७. 14d प्रशस्यते] A, प्रशंसितम् C^2, D, F, G.

८. 15a प्रभृति] SNB., प्रकृतिर् A, C^2, D, F^1, G, प्रभृतिर् F^2 ; चाष्टाश्रं] SNB., °रष्टाश्रं A, D^1, F^2, °ष्टाग्रं C^2, D^2, G, °ष्टांशं F^1.

९. 15d °मग्राकारं] A^2, F^1, °मश्राकारं A^1, °मग्राणाञ्च C^2, D, G.

१०. 16a केवलं] A^1, F, कैवल्य A^2, C^2, D, G ; 16b शुण्डुपादं] Eds, उदपादं A, C^2, D, G, वृत्तपादं F^1.

११. 16c सकर्णेन] Eds., सवर्णेन A^1(etc.) ; 16d °मतः] A^1, C^1, D, ततः C^2, F^1, G, lacune F^2.

१२. 17b °मिष्यते] A, D, F, G, वर्धिते C^2, lacune C^1.

अश्राकारास्यकं मध्ये स्तम्भद्विगुणविस्तरम्[१] ॥ १७ ॥
अष्टाश्रसंयुतं पादमष्टाश्रमिति कीर्तितम्[२] ।
मूले द्विदण्डमात्रेण पद्मासनसमन्वितम्[३] ॥ १८ ॥
[४]शेषं हि कलशोपेतं वृत्तं वा चतुरश्रकम्।
अन्वितं कुम्भमण्डीभ्यां सुन्दरं नामसंयुतम्[५] ॥ १९ ॥
अष्टाश्रे वाथ वृत्ते वा पादायामं त्रिभागकम्[६] ।
केसरीरूपसंयुक्तं सिंहपादमिति स्मृतम्॥ २० ॥

[३. पादालङ्काराः]

[३.१. कुम्भलक्षणम्]

सर्वं पोतिकया युक्तं कुम्भालङ्कार उच्यते[७] ।
अध्यर्धमग्रपादेन पादहीनद्वयं तथा[८] ॥ २१ ॥
द्विगुणं दण्डमानेन कुम्भोत्सेधं विशेषतः।
[९]श्रीकरं चन्द्रकान्तं च सौमुख्यं प्रियदर्शनम्॥ २२ ॥
[१०]यथाक्रमेण वक्ष्यामि कुम्भोत्सेधं नवांशकम्।
तद्वै धृगैकभागः स्याच्चत्वारि कलशोन्नतम्[११] ॥ २३ ॥
कण्ठमेकांशमित्याहुरास्यमेकांशमेव वा।

---

१. 17c अश्राकारास्यकं] Eds., अग्राकाराग्रजं A, F, अग्राकाराग्रकं C, D, G ; 17d विस्तरम्] C, विस्तरान् A^1, G, विस्तरात् D, F.

२. 18a अष्टाश्र°] SNB., अष्टाग्र° A^1(etc.) ; 18b अष्टाश्रम्] A, F, ज्येष्ठाश्रम् C (?), चेष्टाश्रं D, G.

३. 18c मूले द्विदण्ड°] A, D^2, F, मूलेन दण्ड° C^1, मूलद्विदण्ड° C^2 ; 18d पद्मासनसमन्वितम्] C^2, पद्मं सुदलसंयुतम् A, पद्मासनेन +++ C^1, पद्मासनेन संयुतम् D, G, lacune F.

४. C^1 : lacune correspondant à 19a-20a.

५. 19d सुन्दरं नामसंयुतम्] A, F, सुर + नामसम्वितम् C^2, D^1, G, सुरं नमसंयुतम् D^2.

६. 20a अष्टाश्रे] A, D, F, अष्टधा C^2, अष्टाश्रो G ; 20b पादायामं त्रिभागकम्] D^1, पादायन्त्रितभागया A^1, पादायामत्रिभागया C, F^1, पादायामत्रिभागिकं D^2, पादायमं त्रितभागया F^2, G.

७. 21a पोतिकया युक्तं] A^2, C, D, G, कपोतिकायुक्तं A^1, वोधिकया युक्ता F.

८. 21c अध्यर्धमग्रपादेन] F^2, अर्धार्धमश्रपादेन A^1, अर्धार्धमग्रपादेन A^2, अर्धमग्रेण पादेन C, अर्धमग्रपादेन + D^1, अर्धमग्रपादेन D^2, अर्धार्धमग्रपान् F^1, अर्ध + मग्रपादेन G.

९. F^1 : lacune correspondant à 22c-23d.

१०. C^1 : lacune correspondant à 23.

११. 23c धृगैकभागः] A, धृगैकभागं C^2, D, G, तीव्रैकभागं F^2 ; 23d कलशो°] A, D, F^2, G, कलयो° C^2.

तत्पद्ममेकभागेन वृत्तहीने तथांशकम्[१] ॥ २४ ॥
धृक्कण्ठौ पादविस्तारौ हीनेऽधः पादमूलवत्[२] ।
द्विगुणं कुम्भविस्तारमास्यमंशेन वृत्तकम्[३] ॥ २५ ॥

[३.२. मण्ड्यादिलक्षणम्]

[४]मण्ड्यायामं चतुर्दण्डं त्रिदण्डं वापि कारयेत्[५] ।
[६]तदुत्सेधं त्रिपादं स्यात्तत्त्रियंशेन भाजयेत्[७] ॥ २६ ॥
[८]अंशेनोत्सन्धिकं कुर्याद्वेत्रमंशेन वृत्तकम्[९] ।
अंशेन मण्डिकां कुर्यात्पाल्याकारं तु पत्रवत्[१०] ॥ २७ ॥
त्रिधा नागदंशाभं वा वीरकाण्डं तदूर्ध्वतः[११] ।
[१२]पादोच्चं तु तदर्धेन सर्वेषां चतुरश्रकम्[१३] ॥ २८ ॥
हीनेऽधस्तात्तदर्धेन स्कन्धोच्चं चोर्ध्वमम्बुजम्[१४] ।

---

१. 24d वृत्तहीने तथांशकम्] F, वृत्तभिन्नौ तदंशकम् A^1, वृत्तभिन्नौ तथांशकम् A^2, वृत्तहीनौ तथांशकम् C^1, D, G, वृत्तहीनं तथांशकम् C^2.

२. 25a धृक्कण्ठौ पादविस्तारौ] Eds., धृक्कर्णौ पादविस्तारौ A, G, धृत्कर्ण ++++ C^1, धृतकण्ठौ पादहीनौ C^2, धृत्कण्ठौ पादविस्तारौ D, हृत्कण्ठौ पादविस्तारौ F^1, हृत्कर्नौ पादविस्तारौ F^2 ; 25b हीनेऽधः] A^1, हीनोऽथो A^2, हीनौ यौ C, G, हीनो धौ D, अधोपद्मवत् F.

३. कुम्भ°] A^1(etc.), क्रम° A^2 ; 25d आस्यमंशेन वृत्तकम्] A, मध्यरध्वर्थविस्तरम् C^1, अध्यारं द्व्यर्धविस्तरम् C^2, अद्यं द्वयविस्तरम् D, आस्यमर्धर्चविस्तरम् F.

४. A^1 et A^2 omettent 26ab-27ab.

५. 26a मण्ड्यायामं] C^1, D^2, मध्यावामं C^2, मण्ड्याधामं D^1, मध्यामायाम् F, मण्ड्यायं च G ; चतुर् दण्डं] A(etc.), च दण्डं स्यात् C^2 ; 26b वापि] C, D, G, अथ F.

६. C^1 : lacune de 26cd à 27c.

७. त्रिपादं स्यात्त्°] A(etc.), त्रिपादस्य त्° D ; 26d तत्त्रियंशेन भाजयेत्] Eds., तदंशेनैव कारयेत् C^2, तत्यंशेन + कारयेत् D^1, तद्व्यंशेन + कारयेत् D^2, G(var.), तत्र्यंशेन + तत्त्रिण्यंशेन भाजयेत् F, कारयेत् G.

८. D^1 omet 27b-27c.

९. 27a अंशेनोत्सन्धिकं] C^2, D, अंशेनोत्सेधकं F, अंशेनो +सकं G.

१०. 27c मण्डिकां] A^1, D^2, F^2, मण्डनं C^2, मण्डिकौ A^2, मण्डीतां F^1, कर्णिकां G ; 27d पाल्याकारं तु पत्रवत्] A^2, C, D^2, G, पाल्यौकारन्तु पत्रवत् A^1, पाल्याकारं तु पद्मवत् F.

११. 28a नागदंशाभं वा] Eds., नागदशाभं वा A, नागदलाभा वा C, नागदलाभं वा D, F, G.

१२. F^1 : lacune 28cd-29ab ; F^2 omet 28cd et donne pour 29ab : त्रिपादस्योच्चदण्डेन स्कन्दोच्चं नोर्ध्वमम्बुजम्।

१३. 28c तदर्धेन] A, C^1, D, G, तदूर्ध्वेन C^2.

१४. 29a हीनेऽधस्तात्] D^1, हीनोऽधस्तात् A^1, हीरोऽधस्तात् A^2, D^2, हीनस्ततस् C, भीरो

मालास्थानं तथाधस्ताद्दण्डं चायतविस्तृतम्[१] ॥ २९ ॥

[३.३. कुम्भभेदाः]

[२]श्रीकरं वृत्तपादानां सर्वेषामपि संमतम्।
अष्टाश्रं षोडशाश्रं च चन्द्रकान्तं प्रशस्यते[३] ॥ ३० ॥
सौमुख्यं चतुरश्राणामष्टाश्राणां विशेषतः[४] ।
अतिभारेषु स्तम्भेषु प्रियदर्शनमिष्यते॥ ३१ ॥

[३.४. पोतिकालक्षणम्]

दण्डोच्चसमविस्तारं पञ्चदण्डायतं भवेत्[५] ।
पोतिकानामिदं श्रेष्ठं सर्वाङ्गस्तम्भसंयुतम्[६] ॥ ३२ ॥
चतुर्दण्डायतं चैवमुत्सेधं तत्रिपादकम्[७] ।
मध्यमा इति विज्ञेया कुम्भस्तम्भेषु योजिता[८] ॥ ३३ ॥
[९]त्रिदण्डायतविस्तीर्णं दण्डोच्चार्धं तु कन्यसम्।
कुम्भमण्डीविहीने तु योजयेत्तु विचक्षणः[१०] ॥ ३४ ॥
सार्धत्रिपाददण्डं वा कन्दानां कर्तनिर्गमम्[११] ।

ततो (?) G ; 29b स्कन्दोच्चं] A(etc.), स्कन्दोर्ध्वे D^1.

१. 29c तथाधस्ताद्] A^2, C, D^1, तदाधस्ताद् A^1, तथा तस्माद् D^2, G, ततस्तत्तद् F ; 29d दण्डं चायतविस्तृतम्] C, D, G, अदण्डं चाथ विस्तृतम् A, अदण्डेनायतविस्तरा F.

२. C^1 : lacune 30b-31c.

३. 30c अष्टाश्रं] A, D, G, अष्टाग्रं C^2, षडश्रं F ; 30d °कान्तं प्रशस्यते] A, C^2, D, G, °कान्तमिति स्मृतम् F.

४. 31a चतुरश्राणाम°] A, C^2, D, चन्द्रकाश्राणाम° G.

५. 32a °च्चसमविस्तारं] A, C^2, D, G, °च्चसोविस्तार° F^1, °च्चसमविस्तार° F^2.

६. 32c पोतिकानाम्] A, भौतिकानाम् C, पौतिकानाम् D, G, बोधिकानाम् F.

७. 33a चतुर्दण्डायतं चैवम्] F, चतुर्धायतनं तत्र A, चतुर्धा यत्र उत्सेधं C, D^1, G(var.), चतुर्था यत्र उत्सेधं D^2, G ; 33b उत्सेधं तत्रिपादकम्] A, D^1, तत्रिपादकं मध्यमम् C^1, तत्रिपादकमध्यमम् C^2 , त्रिपादक्रममध्यमा D^2, उत्सेधं स्यात्रिवादिकम् F^1, उत्सेधं स्यात्रिपादकम् F^2, तत्रपादकमध्यमा G.

८. 33c मध्यमा इति विज्ञेया] A, D^1, F, + + + इति विज्ञाय, C^1, G, इति विज्ञाय मतिमान् C^2, इति विज्ञेया कुम्भ D^2 ; 33d योजिता] A, C^1, D, F, G, योजितान् C^2.

९. C^1 : lacune 34b-35c.

१०. 34c कुम्भमण्डी°] A, D, G, कुम्भमण्डि° C^2, कुम्भमण्डप° F^1, कुम्भमण्ड° F^2 ; विहीने] F, विहीनं A^1(etc.).

११. 35a सार्ध°] A, सार्धं C^2, D, G, समं F ; 35b कन्दानां कर्तनिर्गमम्] A, कटीनां कर्तृनिर्गमः C^2, G, कटीनां वक्रनिर्गमम् D^1, कटीनां तु निर्गमम् D^2, कर्तरी कर्णतिगति F^1, कर्तरीकश्च निर्गतिः F^2. Lire कर्णनिर्गमम् ?

विस्तारस्य चतुर्भागे तरङ्गस्थानमिष्यते॥ ३५ ॥
गृहीतोच्चत्रिभागैकं भागोच्चं त्वग्रपट्टकम्[१] ।
एवमुक्तं तु पादानां प्रस्तरं चाधुनोच्यते[२] ॥ ३६ ॥

[४. प्रस्तरवर्गः]

पोतिकोर्ध्वे न्यसेद्धीमानुत्तरं त्रिविधं पुनः[३] ।
पादव्यासोदयं यावदुत्सेधं चोत्तरोत्तमम्[४] ॥ ३७ ॥
[५]पत्रोत्तरमिति ज्ञेयं तारं दण्डप्रमाणतः[६] ।
त्रिपादोच्चं पत्रबन्धं मध्यमं चार्धमुन्नतम्[७] ॥ ३८ ॥
विस्तारं प्रागिवैवोक्तं कन्यसोत्तरमेव हि[८] ।
अर्धपादं त्रिपादं वा कर्णनिर्गतिरुच्यते[९] ॥ ३९ ॥
स्तम्भं त्रिभागभागैकं चतुर्भागैकमेव वा।
तदेव चतुरश्रं स्यादुत्तरोपरिवाजनम्[१०] ॥ ४० ॥
[११]वाजनोर्ध्वे विशेषेण दण्डोच्चं भूतभागिकम्[१२] ।
[१३]निर्गमं तत्समं चोर्ध्वे पट्टिका पूर्ववद्भवेत्॥ ४१ ॥

---

१. 36b त्वग्रपट्टकम्] A, चाश्रपट्टिका C, D, G, तत्र पट्टकम् F.

२. 36c एवमुक्तं तु पादानां] F^2, G, एवमुत्तरपादानां A, एवमुक्ता सपादानां C^2, D, F^1 ; 36d प्रस्तरं चाधुनोच्यते] A^2, D, F, विस्तारस्त्वधुनोच्यते A^1, lacune C^1.

३. 37a पोतिकोर्ध्वे] C, D, G, पोतिकोर्ध्वं A, बोधिकोर्ध्वे F.

४. 37d चोत्तरोत्तमम्] F, G, चोत्तरोत्तरम् A, C, D.

५. C^1 : lacune 38a-d.

६. 38a पत्रोत्तरमिति] A, C^2, D, G, खण्डान्तरमिति F^1, खण्डोत्तरमिति F^2 ; 38b तारं दण्ड॰] Eds., तारं दण्डं A, D, F, दारदण्ड॰ C^2, G.

७. 38c त्रिपादोच्चं पत्रबन्धं] C^2, D, G, त्रिपादोत्पादबन्धं स्यात् A^1, त्रिपादोच्चं पादबन्धं स्यात् A^2, त्रिपादोच्चं पद्मबन्धम् F ; 38d मध्यमं चार्धमुन्नतम्] Eds., मध्यमं चार्धमुत्तमम् A, स्यान्मध्यं चार्धमुन्नतम् C^2, D, G, मध्यमं चोर्ध्वमुन्नतम् F.

८. 39a प्रागिवैवोक्तं] A, +++ चोक्तं स्यात् C^1, प्रागिवोक्तं स्यात् C^2, D, F^2, G, lacune F^1.

९. 39d कर्णनिर्गतिर्] A, कण्ठदिग्गतिर् C^1, D, कण्ठदिग्गीतिर् C^2, lacune $F^{1\text{-}2}$, कर्णदिग्गतिर् G.

१०. 40d वाजनम्] C^1, F, G(var.), वाजिनम् A, C^2, D, G.

११. F^1 omet 41cd-42ab.

१२. 41a वाजनोर्ध्वे] C, F^2, वाजिनोर्ध्वे A, D^1, G, वाजयोर्ध्व D^2, वाजोर्ध्वे G(var.) ; 41b दण्डोच्चं] A, C, D^2, F^2, G, दण्डोर्ध्वं D^1, दण्डार्चं F^2 ; भूतभागि॰] A5etc.), मृतभागि॰ D^1.

१३. F^2 : lacune 41cd-42ab ; C^1 : lacune 41d-42d.

कपोतं द्विदण्डोत्सेधं त्रिदण्डं वापि कारयेत्[१] ।
निर्गमं तत्समं प्रोक्तं लम्बमानार्धदण्डकम्[२] ॥ ४२ ॥
शेषांशं पञ्चभागेन योजयेत्तु विशेषतः[३] ।
अंशेनालिङ्गमेवं स्यात्पादाद्बहिः स निर्गतिः[४] ॥ ४३ ॥
तत्समान्तरितोत्सेधमालिङ्गं समवेशनम्[५] ।
प्रस्तरं मकरोपेतमुत्सेधं तु त्रियंशकम्[६] ॥ ४४ ॥
पार्श्वे प्रतिशिखोपेतं अग्रे पृष्ठे प्रतिद्वयम्[७] ।
आलिङ्गस्य समोत्सेधं निर्गमं प्रतिवाजनम्[८] ॥ ४५ ॥
नासिका स्तम्भविस्तारमध्यर्धं द्विगुणोऽपि वा।
एवं समासतः प्रोक्तं पादविस्तारनिर्गमम्[९] ॥ ४६ ॥
॥ इति श्रीदीप्तशास्त्रे प्रतिष्ठातन्त्रे पादवर्गपटलः [पञ्चमः][१०] ॥

१. 42a कपोतं द्विदण्डोत्सेधं] A^1, G, कपोतद्विदण्डोत्सेधं A^2, कम्पो द्विदण्डमुत्सेधं C^2, D^2, कपोतदण्डमुत्सेधम् D^1.

२. 42d °मानार्ध°] A^1, C^2, D^1, G, °मानार्थ° A^2, D^2, °मानम° F^1, °मानोहा° F^2.

३. 43a शेषांशं] A, G, तेषांशं C^1, तेषामंशं C^2, शेषांश D, शेषाभं F^1, शेषा ++ F^2 ; 43b योजयेत्] A, C^2, भाजयेत् C^1, D, F, G.

४. 43c अंशेनालिङ्ग°] A, C^2, D^2, F, अंशेन लिङ्ग° C^1, D^1, G ; 43d पादाद्बहिः स निर्गतिः] A^1, पादाद्बहिः समनिर्गतिः A^2, lacune C^1, वाकवहिः समनिर्गमम् C^2, पाद्बहिः समनिर्गति D, F, पाद्बहिः समनिर्गतिः G.

५. 44b समवेशनम्] A, F, समवेशितम् C, D, G.

६. 44c मकरोपेत°] F^1, °मेकरोपेत° A, मकरोत्पेत° C, D, F^2, G ; 44d त्रियंशकम्] A^2, D, G, त्रयंशकम् A^1, C, द्विभागया F.

७. 45a प्रतिशिखोपेतं] C, D, F, G(var.), प्रतिमुखोपेतं A, वृतिशिखोपेतं G.

८. 45c समोत्सेधं] A(etc.), समुत्सेधं C^2, F^1 ; 45d प्रतिवाजनम्] Eds., पत्रमञ्जने A^1(etc.), प्रतिवाचनम् F.

९. 46d प्रोक्तं पादविस्तारनिर्गमम्] A^1, प्रोक्तौ पादविस्तारवर्गकौ A^2, C, D, G, प्रोक्तं पादस्तम्भं विशेषतः F ; F^1 et F^2 ajoutent avant le colophon : पादवर्गमिदं प्रोक्तं प्रासादं शृणु साम्प्रतम्।

१०. A^2 : इति दीप्तशास्त्रे प्रतिष्ठातन्त्रे पादवर्गषष्ठाः पटलः ; C^1 : इति दीप्तशास्त्रे प्रतिष्ठातन्त्रे पादवर्गविधिः पञ्चमः पटलः ; C^2 : इति श्रीदीप्तशास्त्रे प्रतिष्ठातन्त्रे पादवर्गविधिः पञ्चमः पटलः ; D : इति दीप्तशास्त्रे प्रतिष्ठातन्त्रे पादवर्गपटलष्षष्ठाः ; F : इति दीप्तशास्त्रे प्रतिष्ठायां पादवर्गषष्ठाः ; G : इति दीप्तशास्त्रे प्रतिष्ठातन्त्रे पादवर्गविधिः पञ्चमः पटलः।

[षष्ठः पटलः]
[एकतलप्रासादविधिः][१]

अथातः संप्रवक्ष्यामि प्रासादानां तु लक्षणम्[२] ।
महान्त्यल्पद्व्यन्तराणि त्रिविधेनोच्यते मया[३] ॥ १ ॥
तेषां नामानि मानानि हस्तसङ्ख्या च वक्ष्यते[४] ।
[५]तस्माद्धस्तविधिं चैव अङ्गुलानां प्रमाणकम्[६] ॥ २ ॥

[१. अङ्गुलादिमानम्]

त्रिविधमङ्गुलं चैव पूर्वं मानाङ्गुलं विदुः[७] ।
मात्राङ्गुलं द्वितीयं तु देहलब्धं तृतीयकम्[८] ॥ ३ ॥

[१.१. मानाङ्गुलम्]

बालोदयगते रश्मौ जालान्तरगतं यतः[९] ।
दृश्यादृश्यं तु यत्प्रोक्तं परमाणुरितीष्यते[१०] ॥ ४ ॥
[११]परमाण्वष्टगुणितं रेणू रेण्वष्ट रोमकम्[१२] ।
[१३]रोमाष्टगुणितं लीक्षा तदष्टौ यूकमेव च[१४] ॥ ५ ॥

---

१. Manuscrits utilisés : A^1, A^2, C^1, C^2, D^1, D^2, F^1, F^2, G.

२. 1a अथातः संप्रवक्ष्यामि] A, C, D, G, अतः परं प्रवक्ष्यामि F.

३. 1c महान्त्यल्पद्व्यन्तराणि] SNB., महत्यल्पद्व्यन्तराणि A, C^2, D, G, महन्त्यल्पद्व्यन्तराणि C^1, महत्यल्पं चतुः पञ्च° F ; 1d मया] A, C, D, G, ऽधुना F.

४. 2a नामानि मानानि] A^2, C^2, D, G, नामानि नामानि A^1, F^2, मानि मानानि C^1, नामानि हस्तं F^1 ; 2b हस्तसङ्ख्या] A, C, D, G, सङ्घयां (?) F^1, हस्तं सङ्ख्यां F^2.

५. C^1 : lacune 2c-4a.

६. 2d अङ्गुलानां प्रमाणकम्] C^2, D, अङ्गुलामप्रणामकम् A^1, अङ्गुलामाप्रमाणकम् A^2, चाङ्गुलानां प्रमाणकम् F, अङ्गुलीनां प्रमाणकं G.

७. 3a °मङ्गुलं चैव] A, D, G, चाङ्गुलं चैव C^2, °मङ्गुलं प्रोक्तं F ; 3b पूर्वं मानाङ्गुलम्] A(etc.), पूमानागाङ्गुलम् F^2.

८. 3c द्वितीयं] A^2, C^2, D, F, G, तृतीयं A^1 ; 3d देहलब्धं] A(etc.), देहाल्लब्धं F^2.

९. 4a गते] A(etc.), गतौ D^1 ; रश्मौ] A, D^1, G, युग्मे C^2, रग्रौ D^2, रम्यौ F^1, रव्यौ F^2.

१०. 4d परमाणुरितीष्यते] A, lacune C^1, तत्परीमाणमिष्यते C^2, F^2, तत्परमाणुरिष्यते D, G, तत्परमाणम्विशेष्यते F^1.

११. A^1 omet 5b-5c.

१२. 5a परमाण्वष्ट°] C^2, F, परमाणुनाष्ट° A, D, G, lacune C^2 ; 5b रेणू रेण्वष्टं रोमकम्] C, रेणुरेण्वष्टरोमकं A^2, D^2, G, रेणुरष्टौ च रोमकम् D^1, रथरेणुः प्रकिर्तीता F.

१३. F^1 omet 5cd-6ab.

१४. 5c रोमाष्टगुणितं लीक्षा] A(etc.), रधरेत्वष्टमेवं स्यात् F^2 ; 5d तदष्टौ यूकमेव च] C^2,

[१]अष्टौ यूकं यवः प्रोक्तो यवोदरं चाष्टमङ्गुलम्[२] ।
[३]तद्द्वादशाङ्गुलं युग्मं प्रोक्तं तद्द्वयं हस्तके[४] ॥ ६ ॥
तच्चतुर्विधमुक्तं च हस्तमानं विशेषतः[५] ।
चतुर्विंशाङ्गुलं ज्ञेयं किष्कुरित्युच्यते बुधैः[६] ॥ ७ ॥
[७]पञ्चविंशतिभिश्चैव प्राजापत्यमुदाहृतम्[८] ।
[९]षड्विंशतिर्धनुर्मुष्टिः सप्तविंशद्धनुर्ग्रहः[१०] ॥ ८ ॥
शयनासनादिकान्कुर्यात्किष्कुमानवशाद्बुधः[११] ।
प्राजापत्यं विमानानां सभाशालां तथैव च[१२] ॥ ९ ॥
[१३]ग्रामादीनां च दुर्गाणां धनुर्मुष्टिर्विधीयते।

लीक्षाष्टौ युगमेव च A^1, D^1, G, लिष्टौ यूकमेव च A^2, lacune C^1, लीक्षाष्टौ स्त्रकमेव च (?) D^2, रामाष्ट्रगुणलिक्षया (?) F^2.

१. F^2 remplace 6ab par : रीष्टाभिरष्टरूक्षं स्यात्यूकादष्टगुणं यवाः। यवोदरं चाष्टमङ्गुल्यं तत्तद्वृद्धिप्रकीर्तिताः॥

२. 6a अष्टौ यूकं यवः प्रोक्तो] A, lacune C^1, अष्टयूकं यवकं प्रोक्तो C^2, आष्टयूकं यवः प्रोक्तो D^1, G, अष्टस्त्रकं यवरप्रोक्ता D^2 ; 6b यवोदरं चाष्टमङ्गुलम्] (*v.f.*) A^2, D, वोदरं चाष्टमङ्गुलम् A^1, यवोदं चाष्टमङ्गुलम् C, यवादष्टममङ्गुलम् G.

३. C^1 : lacune 6c-8a ; F^1 et F^2 remplacent 6cd-8ab par : तद्द्वादशाङ्गुलायामं यमद्वयेन हस्तकम्। चतुर्हस्तदण्डं तु हस्तं चतुर्विधमुच्यते। चतुर्विंशत्यङ्गुलं हस्तं किष्कुनाममिति स्मृतं॥ पञ्चविंशतिरङ्गुल्यं प्राजापत्यमिति स्मृतम्।

४. 6c युग्मं] A(etc.), समं D^2 ; 6d तद्द्वयं] D, G, ते द्वय॰ A^1, तद्वय॰ A^2, तद्यव॰ C^2.

५. 7a ॰विधं] A(etc.), ॰विध॰ D^1 ; 7b हस्तमानं विशेषतः] A, G, हस्तानां च विशेषतः C^2, D.

६. 7c ॰विंशाङ्गुलं] A^1, C^2, D^1, G, ॰विंशत्यङ्गुलं A^2, D^2 ; 7d किष्कुरित्य्] A, D^2, G, किमित्य् C^2, किक्षुरिति D^1.

७. G : lacune 8b-9b.

८. 8a पञ्चविंशतिभिः चैव] A, C^2, D^1, G, पञ्चवींशति भागैव D^2.

९. 8ab = *Mayamata* 5.6a.

१०. 8c ॰शतिर्धनु॰] A^1(etc.), ॰शतिधनु॰ A^2 ; 8d ग्रहः] A, D^2, lacune C^1, क्रमम् C^2, गृहम् D^1, ग्रहम् F^1.

११. 9a शयनासनादिकान्] (*v.f.*) A^2, शयनासादिकान् A^1, शयनादिमादिकं C^1, शयनादिमादिकं C^2, D, शयासानादिकं F^1, शयनास्नादिकान् F^2 ; 9b किष्कुमानवशाद्बुधः] A^1, F, lacune A^2, निष्कमानवशात्पुनः C^1, D^1, निष्क्रामानवशं पुनः C^2, D^2.

१२. 9c ॰पत्यं वि॰] C, D, F, G, ॰पत्यवि॰ A ; 9d सभाशालां] A, D, F^2, G, lacune C^1, शम्भुशालीं C^2, सम्भाताला F^1.

१३. C^1 : lacune 10b-11b.

धनुर्ग्रहेण कुर्यात्तु नद्याध्वानं विशेषतः[१] ॥ १० ॥
हस्तानां लक्षणं प्रोक्तं मानाङ्गुलविधानतः[२] ।

[१.२. मात्राङ्गुलम्]

यागोपकरणं सर्वं कुर्यान्मात्राङ्गुलेन तु[३] ॥ ११ ॥
षण्णवत्यङ्गुलं मेयं स्वाङ्गुलेनोत्तमं स्मृतम्[४] ।
[५]अङ्गुलैर्नवतिभिश्च मध्यमं च विदुर्बुधाः[६] ॥ १२ ॥
पञ्चाशीत्यङ्गुलैर्मेयं पुरुषाधममुच्यते[७] ।
[८]मध्यमध्यं पुरुषस्य यत्पर्वं दक्षिणे करे[९] ॥ १३ ॥
[१०]मध्यमाङ्गुलमध्यं तु देवमात्राङ्गुलिं विदुः[११] ।

[१.३. देहलब्धाङ्गुलम्]

यत्कृत्स्नं प्रतिमायामं तालगण्येन भाजयेत्[१२] ॥ १४ ॥

---

१. 10c ग्रहेण] A, C^2, G, गृहेन D^2 ; 10d नद्याध्वानं] F, नद्यद्धानां A^1, नद्यं धानां A^2, तद्वर्धनं C^2, नस्वद्धानां D^1, नद्वद्धानां D^2, नद्वर्धानां G.

२. 11a विधानतः] A, F^2, विधानकम् C^2, D, G, विनलगे F^1.

३. 11c कुर्यान्] A^1, आध्यान् A^2, अथा C^2, मया D^1, G, माया D^2, मेयं F^1, मयं F^2.

४. 12a °ङ्गुलं मेयं] C, D, G, °ङ्गुलमयं A, °ङ्गुलैर्मेयं F ; 12b स्वाङ्गुलेनोत्तमं स्मृतम्] A^2, C, D, G, स्वाङ्गुलेनोक्तमस्त्रतः A^1, अङ्गुलैः कत्तमो नरः F^1, अङ्गुलैरुत्तमो नरः F^2.

५. Les manuscrits C et F donnent des versions différentes de 12cd-13cd :
C^1 : अङ्ग +++++ ++ मं च विदुर्बुधः। पञ्चविंशत्यङ्गुलैर्मेयं पुरुषाङ्गिं मध्यं तु तधे॥
C^2 : अङ्गुले नवनिम्नेयं मध्यमं च विदुर्बुधाः। पञ्चविंशत्यङ्गुलं हि पुरुषाधम उच्यते॥
मध्यमं मध्यपुरुषं यत्सर्वं दक्षिणे करे॥
F : अङ्गुलैर्नवतिर्मेयं मध्यमं च विभाजितं। पञ्चाशत्यङ्गुले मेयम् अधमः पुरुषोच्यते॥
मध्यमः पुरुषोओत्सेधं यत्पूर्वं दक्षिणे करे॥

६. 12c नवतिभिश्च] A^1, नवतिभिर्यत् A^2, नवनिम्नेयं D, नवनिर्मेयं G.

७. 13a पञ्चाशीत्यङ्गुलैर्मेयं] SNB., पञ्चाशत्यङ्गुलैर्माघं A^1, पञ्चाशदङ्गुलैर्माधं A^2, पञ्चविंशतिरन्गुलैर्मेयं G, D ; 13b °धममुच्यते] D, °याममुच्यते A ; °धर्ममुच्यते G.

८. C^1 : lacune 13c-15d.

९. 13cd मध्यमध्यं पुरुषस्य यत्] SNB., मध्यमं मध्यपुरुषं यत् A^1, C^2, मध्यमं मध्यपुरुषस्य A^2, G, D ; पर्वं] A^2, D, पूर्वं A^1, सर्वं C^2, lacune G.

१०. C^2 omet 14ab.

११. 14a °माङ्गुलि°] A^2, F^2, D, °माङ्गुल° A^1 ; 14b देवमात्राङ्गुलं] A^1, देवमं मात्राङ्गुलं A^2, तदेन मात्रं D, देवात्राङ्गुलं F, तदेव मात्रं G.

१२. 14c यत्कृत्स्नं प्रतिमायामं] A, यत्कृतं प्रतिमायामं C^2, यत्कृतस्ता वृतीरायामं, यत्कस्तं D^1, यत्कृस्तं D^2, यत्कृत्स्नं प्रतियामं तु F ; 14d तालगण्येन] A^1, C^2, D^1, G, तालगण्ढेन

तल्लब्धोत्सेधमानं तु चतुर्विंशच्छतं कुरु[१] ।
तेष्वेकभागमङ्गुल्यं देहलब्धमिति स्मृतम्[२] ॥ १५ ॥

[२. एकभूमिप्रासादविस्तारः]

अधुना संप्रवक्ष्यामि एकभूमिप्रमाणकम्।
[३]त्रिहस्तं पञ्चहस्तं च सप्तहस्तं नवं तथा॥ १६ ॥
चतुर्विधेन विस्तारमेकतलस्य कीर्तितम्।
[४]विस्तारद्विगुणोत्सेधं सर्वेषां तु विधीयते[५] ॥ १७ ॥
अग्रतो मण्डपं कुर्यात्प्रासादसमविस्तृतम्।
[६]तदर्धं वा त्रिपादं वा मुखमण्डपमिष्यते[७] ॥ १८ ॥

[३. एकभूमिप्रासादोन्मानम्]

सर्वाङ्गसहितं कुर्यात्प्रासादं सविशेषतः[८] ।
उपानं जगतीं चैव कुमुदं कम्पमेव च[९] ॥ १९ ॥
कम्पं तु तत्समायुक्तं कम्पं च प्रतिरेव च[१०] ।
[११]पादमूलं च वेदिः स्याद्वेदिका कण्ठसंयुतम्[१२] ॥ २० ॥

A², तालगंथ्येन D², तालागन्थेन F.

१. 15a तल्लब्धोत्सेधमानं तु] A, प्रतिलब्धं समानं C², तल्लब्धोद्यमानं D¹, तल्लब्धोत्सेवमानं D², यल्लल्ब्धोत्सेधमानं तु F, lacune G ; 15b °विंशच्छतं] A, D, F², G, °विंशद्युतं C², °विंशद्य तं F¹.

२. 15c तेष्वेकभागमङ्गु°] A², C², D, F², G, तेष्वेकभागमाङ्गु° A¹, तेष्वङ्गामङ्गु° F¹.

३. C¹, D¹ : lacune 16d.

४. C¹ : lacune 17d-18a.

५. 17c विस्तारद्वि°] A¹(etc.), विस्तारं द्वि° A² ; 17d सर्वेषां तु विधीयते] A, lacune C², D, G, सर्वापानां विधीयते F¹, सर्वाल्पानां विधीयते F².

६. C¹ : lacune 18d-20a.

७. 18c तदर्धं वा] A, C, D, G, अर्धं वा F¹, अर्धं वापि F².

८. 19b प्रासादं स°] A, C², D², F², G, प्रासादस्य D¹, प्रासादं सु° F¹.

९. 19c चैव] A, D, F¹, G, चैकं D² ; 19d कुमुदं कम्पमेव च] A, D¹, F¹, कुमुदं कम्पं एव वा C², G, उदकं त्वमेव वा D², कुमुदं पङ्कमेव च F².

१०. 20a कम्पं तु तत्समायुक्तं] A¹, lacune D, G, ++ कृतसमायुक्तं A², C², स्कन्धस्तम्भसंयुक्तं F¹, स्कन्दं च स्तम्भसंयुक्तं F² ; 20b कम्पं च] A, C², D¹, स्तम्भं च F, lacune G.

११. F¹ remplace 20cd par : इदं मूले तु पट्टिं स्याद्वेदिका कण्डसंयुतम्।

१२. 20c कण्ठ°] C, D, G, कुण्ड° A¹, कर्ण° A², F².

पादं सर्वाङ्गसंयुक्तमुत्तरोपरि हंसकम्[१] ।
[२]कपोतं तत्प्रतिं चैव वेदिका गलमेव च[३] ॥ २१ ॥
शिखरं च घटं चैव महानास्यल्पनासिका[४] ।
पञ्जरं च इमे सर्वे विंशत्यंशमुदाहृतम्॥ २२ ॥
उक्षं कुर्याच्चतुष्कोणे प्रस्तरोपरि संस्थितम्[५] ।
षड्वर्गसहितं प्रोक्तं तलमेकं विशेषतः॥ २३ ॥

[४. दण्डलक्षणम्]

यावत्प्रासादविस्तारं चतुर्विंशतिभाजितम्[६] ।
पञ्चविंशतिभागं वा षड्विंशति विभागकम्॥ २४ ॥
तत्तद्भागैकभागं स्यात्पादविष्कम्भमत्र वै[७] ।
अथवा पादमानं तु वक्ष्यते तु विशेषतः[८] ॥ २५ ॥
[९]पादायामाष्टभागं स्यान्नवभागं दशं तु वा[१०] ।
तत्तद्भागैकमेवं स्याद्दारुपादस्य विस्तृतम्[११] ॥ २६ ॥
[१२]तत्पादेनार्धहीनं वा त्रिभागं द्वयमेव वा[१३] ।

---

१. 21b उत्तरोपरि हंसकम्] A^2, C^2, D, F^1, G, मुकुरोपरि हंसकम् A^1, + रपरि हंसकम् C^1, उत्तरोपरि हस्तकम् F^2.

२. C^1 : lacune 21d-24a.

३. 21c तत्प्रतिं चैव] A, C^2, D, तत्प्रतिश्चैव C^1, तु प्रतिश्चेति F, तत्वृतिं चैव G ; 21d गलमेव च] A(etc.), गलमेव वा F^1.

४. 22a शिखरं च घटं] A, C, शिखं च खटं D^1, शिखरं च खटवं D^2, शिखरं च सटं F^1, शिखरं च कटं G ; 22b महानास्यल्पनासिका] A, D, G, महानासाल्पनासिका C^2, महानासिशिल्पिनासिका F^1, महाना कल्पनासिका F^2.

५. 23a संस्थितम्] C^2, F, सुस्थितम् A, सुस्थिरम् D, G.

६. 24b भाजितम्] A, C^2, D, F^2, G, भागकम् F^1.

७. 25a भागं स्यात्] D^2, एकं स्यात् A, C^2, D^1, G, lacune F^1, एवं स्यात् F^2 ; 25b अत्र व] A^2, C^2, D, G, अत्रैव (*v.f.*) A^1, lacune C^1, पत्रकम् F.

८. 25c पादमानं तु] A, पादमानेन C, D, F, G.

९. C^1 très lacunaire de 26a à 26d.

१०. 26a स्यान्] A, C^2, D, G, वा F ; 26b तु वा] A, C^2, D, G, हि वा F.

११. 26c तत्तद्] A, C^2, D, तद् F ; एवं] D^2, एकं A, C^2, D^1, F^1 ; 26d दारुपादस्य विस्तृतम्] A, C^2, D^2, G, तदापादस्य विस्तृतम् D^1, दारुपदस्य विस्तृतं F^1, दाकपादस्य विस्मृतम् F^2.

१२. C, D et G omettent 27ab-28cd.

१३. 27a तत्पादेनार्धहीनं वा] A^1, तद्पादेनाध्वहीनं वा A^2, तत्पादादार्धहीनं F^1, तत्पाददार्धहीनं वा F^2 ; 27b त्रिभागं] A, भागं हि F.

भित्तिपादस्य विस्तारं सर्वेषां तु विधीयते[१] ॥ २७ ॥
पादविष्कम्भमानं यद् अत्र दण्डमिहोच्यते[२] ।

[५. विमानोत्सेधः]

विमानोत्सेधमष्टांशं कृत्वैकेन मसूरकम्[३] ॥ २८ ॥
पादायतद्विभागं स्याद्भागं प्रस्तरमुच्यते[४] ।
भागं ग्रीवमिति प्रोक्तं शिखरं स्याद्विभागकम्[५] ॥ २९ ॥
शेषं स्तूपिरिति ख्यातं सञ्चिते चैकभूमिके[६] ।
[७]यावत्प्रासादविस्तारमेकभागं त्रिभागिकम्[८] ॥ ३० ॥
[९]चत्वारिपञ्चषड्भागमेकभूमेर्विधीयते[१०] ।

[६. षड्वर्गलक्षणम्]

[६.१. उपानादिनिर्गममानम्]

मूलपादस्य विस्तरादष्टांशोनाग्रविस्तृतम्[११] ॥ ३१ ॥
उपानस्य च निर्यूहमग्रपादद्वयं भवेत्[१२] ।
तदर्धं तीव्रमित्याहुस्तन्निर्गमं त्र्यंशकम्[१३] ॥ ३२ ॥

---

१. 27c भित्तिपादस्य] F^2, भक्तिपादस्य A, भक्तिभागस्य F^1 ; 27d तु] A, हि F.

२. 28a विष्कम्भमानं] F^2, विष्कम्पमानं A^1, विष्कम्भमादाय A^2, F^1 ; 28b अत्र दण्डं] A(etc.), द्विदण्डं F.

३. 28d मसूरकम्] SNB., मसूकरम् A, lacune F^1, मसूसकम् F^2.

४. 29a पादायतद्विभागं स्याद्] A, C, D, G, पादायमद्विभागभ्यां F^1, पादायम द्विभागश्याम् F^2 ; 29b भागं] A, F, पादं C, D, G.

५. 29c भागं ग्रीवं] A, F^2, भागाग्रवं C, भागग्रह D^1, भागगृह D^2, भगत्रयं F^1, भागाश्तवं G ; 29d शिखरं स्याद्] A, C, F, G, शिवं स्याद् D.

६. 30a स्तूपिरिति ख्यातं] A^1, lacune C^1, स्थूपिरिति ख्यातं A^2 स्थू +परिख्यातं C^2, तु परिख्यातं D^1, स्तूपरितिख्यातं D^2, स्त्रिभिरिति ख्यातं F^1, त्रिभिरिती ख्यातं F^2, स्तापरिति ख्यातं G ; 30b सञ्चिते] A, D, G, सञ्चितं C, F^2, पञ्चतं F^1 ; चैक°] A(etc.), चैव A^2.

७. D^1 omet 30d-31c.

८. 30d एकभागं त्रिभागिकम्] A, एकभागं त्रिभागकम् C^2, D^2, F, G, विस्तारादष्टांशे C^1.

९. C^1 : lacune 31a-33a.

१०. 31a चत्वारिपञ्चषड्भागम्] A, C^2, D^2, G, पञ्चसप्तद्विभागम् F ; 31b एकभूमेर्वि°] Eds., एकभूमिर्वि° A, C^2, D^2, चैकमाङ्गं वि° F^1, चैकभागं वि° F^2.

११. 31d अष्टांशोनाग्रविस्तृतम्] Eds., अष्टांशेनाग्रविस्तृतम् A, अष्टांशेनाग्रविस्तरम् C^2, D, G, lacune F.

१२. 32a उपानस्य च निर्यूहं] A, D^1, G, उपानस्य च निव्यूहं C^2, D^2, उपान स्यात्तु तद्यूहो F ; 32b अग्रपाद°] A, C^2, D, G, मूलपादं F.

१३. 32c तदर्धं तीव्रं] A^1, C^2, F^2, तदर्धं नित्यं A^2, तत्तदर्धं तीव्रं D, तदर्धप्रतिमाधाहु (?) F^1 ;

द्व्यंशं चाभ्यन्तरे ग्राह्यमेकांशं तु बहिःस्थितम्[१] ।
तत्स्थाने जगतीं कुर्यात्सर्वमेवोच्यते क्रमात्[२] ॥ ३३ ॥

[६.२. अधिष्ठानम्]

[३]अधिष्ठानोत्सेधमानं त्रयोविंशतिमानकम्[४] ।
[५]जगत्यष्टांशकोपेतं सप्तांशं त्वथ वप्रकम्[६] ॥ ३४ ॥
[७]कुमुदमष्टाश्रकं विद्यादेकांशं कुरु पट्टिकाम्[८] ।
[९]कण्ठं त्रियंशमित्युक्तमेकांशेनोर्ध्वपट्टिका[१०] ॥ ३५ ॥
महापट्टी त्रियंशेन पादबन्धमिहोच्यते[११] ।

[६.३. वेदिकामानम्]

तस्योर्ध्वे तु द्विदण्डेन पादमूले तु वेदिका[१२] ॥ ३६ ॥
वेदिकोत्सेधमानं तु नवभागैर्विभाजयेत्।

32d तन्निर्गमं त्रयंशकम्] A^2, C^2, D, तन्नीग्++ मं त्र्यंशकम् A^1, दिव्यं विभज्य त्र्यंशकैः F, त+ निर्गमत्र्यंशकम् G.

१. 33a चाभ्यन्तरे ग्राह्यं] A, C^2, D, G, चान्तरे ग्राह्यां F ; 33b एकांशं तु] A, F^2, एकांशे C, D, G, lacune F^1.

२. 33c तत्स्थाने जगतीं कुर्यात्] C, D, F^1, G, तद्+ जगतीं कुर्यात् A^1, तत्स्थाने जगतीर्यावत् A^2, जगत्याष्टंशकं F^2 ; 33d सर्वमेवोच्यते] A^2, C, D, G, सर्वमेवोर्द्धते A^1.

३. F^1 et F^2 remplacent 34ab par : सुरकोच्छ्रयोवं च (F^1 : सुरकोच्छ्रय योवच्च) चतुर्विंशतिभागिकम्।

४. 34a अधिष्ठानोत्सेधमानं] SNB., धिष्ठानोत्सेधमानं तु A^1, अधिष्ठानोत्सेध + + A^2, अधिष्ठानोत्सेधमात्रं C^1, अधिष्ठानोत्सेधमानं तु C^2, D, G ; 34b lacune C^1.

५. Nous suivons l'ordre des manuscrits F ; dans tous les autres les vers 34d-48c et 48d-63d sont intervertis.

६. 34c जगत्यष्टांशकोपेतं] A, जगत्याष्टंशकं विद्धि F^2, जगत्यष्टांशकं प्रोक्तं C, D, G.

७. C^1 : lacune de 35ab-36ab.

८. 35a °मष्टाश्रकं विद्याद्] A^1, C^2, D, G, °मष्टांशकं विद्याद् A^2, °मष्टाश्रकं ज्ञेयं F ; 35b कुरु] A^1, कण्ठ° A^2, C^2, D, G, खण्ड° F^1, कर्ण° F^2.

९. D^1 omet 35cd.

१०. 35c कण्ठं त्रियंशमित्युक्तम्] A^2, D^2, कर्णत्रियंशमित्युक्तम् A^1, कण्ठं त्रयंशमित्युक्तम् C^2, कण्ठस्य त्रिभिरंशेन F, कण्ठमूर्त्यंशमित्युक्तम् G.

११. 36a महापट्टी त्रियंशेन] A^2, D, G, महापट्टं त्र्यंशेन A^1, महापट्टी त्रयंशेन C^2, त्रिभिरंशैत्महापट्टि F^1, त्रिभिरम्शेन महापट्टि F^2 ; 36b °मिहोच्यते] A(etc.), °नमुच्यते C^2.

१२. 36c द्विदण्डेन] A, C^1, D, F, G, त्रिदण्डेन C^2 ; 36d पादमूले तु] F, पद्ममूलेन A^1, पादमूलेन A^2, C, D, G.

पट्टिकोपरि कम्पांशं कण्ठं चतुर्थभागिकम्[१] ॥ ३७ ॥
[२]एकांशाधारपट्टं तु द्वियंशं वेदिका भवेत्[३] ।
ऊर्ध्वे पट्टं तथैकांशं पादालङ्कारमुच्यते॥ ३८ ॥

[६.४. स्तम्भालङ्काराः]

[६.४.१. कुम्भम्]

[४]तत्पादकुम्भधृक्कण्ठं द्वयार्धं दण्डमुच्यते[५] ।
तस्योत्सेधं नवांशं तु एकभागेन धृग्भवेत्[६] ॥ ३९ ॥
चतुर्भागं कुम्भं स्यात्कण्ठमेकेन कारयेत्[७] ।
[८]आस्यमेकांशमित्याहुरेकांशं पद्ममुच्यते[९] ॥ ४० ॥
[१०]शेषैकांशद्व्यंशकः स्याद्वृत्तमेकेन कारयेत्[११] ।
एकांशेनाथ हीनौ तु हीनौ द्वौ मूलपादवत्[१२] ॥ ४१ ॥
[१३]आस्यविस्तारमत्रैव अध्यर्धं दण्डमुच्यते[१४] ।
द्विदण्डं कुम्भविस्तारं धृक्कण्ठौ पादविस्तृतौ[१५] ॥ ४२ ॥

---

१. 37c पट्टिकोपरि] F, वेदिकोपरि A, C^2, D, G, lacune C^1.

२. C^1 : lacune 38b-40a.

३. 38a एकांशाधारपट्टं] A, D^1, अथोपमैथैकं (?) F^2, lacune C, एकांशारथपदं तु (?) D^2, अधोपट्टिमथैकां F^1, एकांशाभपत्तां G ; 38b द्वियंशं] A, C^2, D, G, द्वाभ्यां F(?).

४. D^1 omet 39ab que F^1 et F^2 remplacent par : तत्वात्कुम्भस्य हृत्कण्थमध्यर्धदण्डमुच्छ्रयम्।

५. 39a °धृक्°] Eds., °दृक्° A^1(etc.) ; 39b कण्ठम्] F^2, दण्डम् A, D^2, F^1, G.

६. 39c तस्योत्सेधं नवांशं तु] A, C^2, G, तस्योत्सेधं नवांशं स्यात् D, F^1, तदस्योत्सेधं नवांशं F^2.

७. 40a चतुर्भागं] (*v.f.*) A, चतस्रभाग° D, F^1, G, lacune F^2.

८. C^2 omet 40cd-41ab.

९. 40d एकांशं पद्ममुच्यते] A, C^1, D, G, एकांशं कमलं पुनः F.

१०. C^1 : 41a-43d très lacunaire et inutilisable.

११. 41a शेषैकांशद्व्यंशकः स्याद्] A, D, G, शेषांशं च द्विधा कृत्वा F.

१२. 41c हीनौ] A, C^2, D, G, भिरौ (?) F^1, हीरौ F^2 ; 41d मूलपादवत्] A(etc.), पादमूलकौ C^2.

१३. F^1 omet 42ab-43cd.

१४. 42b अध्यर्धं दण्डमुच्यते] A(etc.), आस्यार्धं मण्डमेव च F^2.

१५. 42d धृक्कण्ठौ पादविस्तृतौ] A, C^2, हृत्कर्णो पादविस्तृतम् D^1, सृक्कण्ठे पादविस्तृतम् D^2, हृत्कण्ठं पादविस्तृतम् F^2, धृकटौ पादविस्तृतम् G.

[६.४.२. मण्डिका]

त्रिपादं मण्डिनीव्रं स्याद्विस्तारं स्याच्चतुर्गुणम्[१] ।
त्रिगुणं वापि कर्तव्यं पादविस्तारमानतः ॥ ४३ ॥
मण्ड्युत्सेधं त्रिधा कृत्वा भागेनोत्सन्धिरुच्यते।
भागेन मण्डिकां विद्यादेकांशं पालिका भवेत्[२] ॥ ४४ ॥

[६.४.३. वीरकाण्डम्]

पादविस्तारमानेन वीरकाण्डं तदुच्यते।
[३]उत्सेधं पादहीनं स्यात् ;

[६.४.४. पोतिका]

पोतिकायाममुच्यते[४] ॥ ४५ ॥
उत्तमं पोतिकायामं पञ्चदण्डमिहोच्यते[५] ।
मध्यमं तु चतुर्दण्डमधमं स्यात्त्रिदण्डकम्[६] ॥ ४६ ॥
दण्डत्रिपादमर्धं वा पोतिकोत्सेधमुच्यते[७] ।

[६.५. प्रस्तरवर्गः]

दण्डोच्चमुत्तरं कुर्यात्तत्त्रिभागैकवाजनम्[८] ॥ ४७ ॥
भूतमाला च दण्डोच्चमूर्ध्वपट्टी च पूर्ववत्[९] ।
[१०]कपोतोत्सेधं दण्डं स्याल्लम्बमानार्धदण्डकम्[११] ॥ ४८ ॥

---

१. 43a मण्डिनीव्रं स्याद्] A^1, D, मण्डिनीप्रं स्याद् A^2, मण्डनीव्रं स्याद् C^2, मण्डस्तु (?) नीव्रं स्याद् F^2, दण्डो नीव्रं G.

२. 44c मण्डिकां विद्याद्] A^1, C^1, D, G, माण्डिका विद्याद् C^2, मण्डिकां कुर्याद् F ; 44d पालिका] A^1, C, D, G, फलका F.

३. C^1 : 45cd-47c lacunaire et peu utilisable.

४. 45d पोतिकायामम्] A, C^2, D, G, चेधिका मानम् F^1, बोधिकानामम् F^2.

५. 46a उत्तमं] A, F, उत्तरं C^2, D, G ; पोतिकायामं] A, C^2, D, G, बोधिकामानं F^1, बोधिकायामं F^2 ; 46b पञ्चदण्डमिहोच्यते] A^2, C^2, D, G, ++दण्डमिहोच्यते A^1, पञ्चदण्डमिति स्मृतम् F.

६. 46d स्यात्त्रिदण्डकम्] F, तु ++++ A, C^2, D, G.

७. 47a दण्डत्रिपादमर्धं वा] F^1, lacune A, D, G, पादमर्धं वा +++ C^2, दण्डत्रिपादमध्यं वा F^2.

८. 47c दण्डोच्चमु°] A(etc.), मण्डोच्चमु° F^2 ; 47d तत्त्रिभागैक°] D^1, F, तत्त्रिभागेन A, C^2, तत्र भागैक° D^2, G.

९. 48a च दण्डोच्चम्] A, C, D, G, F^1, चतुर्दण्डो F^2.

१०. F^1 omet 48d, 49ab-cd, 50a.

११. 48c कपोतोत्सेधं दण्डं] A, C^1, D, G, कपोतोत्सेधद्विदण्डं F.

द्विदण्डनिष्क्रमान्तं स्यादुपानसमनिर्गमम्[१] ।
[२]शेषं प्रस्तारमानं तु पञ्चभागैर्विभाजयेत्॥ ४९ ॥
[३]अंशेनालिङ्गमेवं स्यादंशेनान्तरितं भवेत्[४] ।
द्व्यंशे प्रतिमुखं कुर्यादंशेन प्रतिवाजनम्॥ ५० ॥

[६.६. ग्रीववेदिका]

त्रिदण्डवेशना वेदी लक्षणेन समन्विता[५] ।
[६]त्रिदण्डं वेदिकोत्सेधं तदुत्सेधं रसांशकम्[७] ॥ ५१ ॥

[८][Lacune?]

द्वियंशं कण्ठमित्युक्तमेकेनाधारपट्टिका[९] ।
[१०]भागेन वेदिकां कुर्याद्भागैकं कम्पमुच्यते॥ ५२ ॥
[११]वेदिविस्तारपञ्चांशं चतुर्भागं ग्रीवविस्तरम्[१२] ।

[६.७. पुनः प्रस्तरवर्गः]

दण्डार्धमुत्तरं वापि तत्रिभागैकवाजनम्॥ ५३ ॥
हंसमाला वा दण्डार्धे तदर्धे हंसपट्टिका।

[६.८. वेद्यादिशिखरान्तविस्तारः]

तत्प्रस्तराष्टभागैकविहीनं वेदिविस्तरम्[१३] ॥ ५४ ॥

---

१. 49b उपानसमनिर्गमम्] Eds., विमानसमनिर्गमम् A^1, C, D, G, सङ्गनिर्गमम् A^2, उपानस्यमनिर्गमम् F^2.

२. C^1 : lacune 49d-51a.

३. 6.50 : très proche de 12.62cd-63ab.

४. 50b अंशेनान्तरितं] C^2, D, F, दृशेनान्तरितं A, G.

५. 51a वेशना वेदी] A, D, F, वेदनांशेति C^2, वेदनाशेति G ; 51b समन्विता] A, C^2, D, G, विशेषतः F.

६. F^1 et F^2 remplacent 51cd-52ab par : द्विदण्डं वेदिकोत्सेधं भजेत्योत्सेधकोस्ततः (F^1 : कोत्ततः)। तत्कर्णात्रिभिरंशैः स्यातेकेनाधरपट्टिका (F^1 : एकोपरिपट्टिका)॥

७. 51c वेदिकोत्सेधं] A, D, वेदिरुत्सेधा C, वेदिरुत्सेधं G ; 51d तदुत्सेधं] A, D, G, उत्सेधं च C.

८. Lacune générale d'un demi-vers au moins entre 51cd et 52ab (nombre de parties incomplet).

९. 52a द्वियंशं कण्ठम्] C, D^2, G, द्वयंशं कन्तुम् (?) A^1, द्वयंशं कर्णम् A^2, द्वियंशकं खण्डम् D^1 ; 52b एकेनाधारपट्टिका] A, D, एकेन परिपट्टिका C^1, एकेनोपरिपत्तिका C^2, G.

१०. F^1 et F^2 omettent 52cd-54ab.

११. C^1 : lacune 53b-56a.

१२. 53b ग्रीवविस्तरम्] (*v.f.*) A^2, D, G, च विस्तरम् A^1, सविस्तरम् C^2.

ब्राह्मयादिना तु संस्थाप्य दक्षिणादि क्रमेण तु[२] ॥ अनु॰२.४७ ॥

[४.१०. अष्टलोकपालाः]

[४.१०.१. इन्द्रः]

इन्द्ररूपमहं वक्ष्ये शृणु वह्ने विशेषतः[३] ।
दिव्याकारं बृहद्रूपं द्विनेत्रं हसिताननम्[४] ॥ अनु॰२.४८ ॥
श्यामवर्णं गजारूढमावृतं चाप्सरोगणैः ।
दिव्याभरणसंयुक्तं दिव्यमालाविभूषितम् ॥ अनु॰२.४९ ॥
वज्रपाणिं गजारूढं कुर्यादिन्द्रं सुराधिपम् ।

[४.१०.२. अग्निः]

दिव्यरूपं सुलावण्यं तप्तकाञ्चनसान्निभम् ॥ अनु॰२.५० ॥
रक्तांबरधरं भीममूर्ध्वगं च शिखान्वितम् ।
शक्तितोमरसंयुक्तं ज्वालामालाविभूषितम् ॥ अनु॰२.५१ ॥
अग्निं कुर्याद्गजारूढं सप्तजिह्वाभिरन्वितम् ।

[४.१०.३. यमः]

महामहिषमारुढं नीलाञ्जनसमप्रभम्[५] ॥ अनु॰२.५२ ॥
दण्डपाशधरं देवं दीप्ताग्निसमलोचनम् ।
कुर्याद्विवस्वतं रूपं क्रुद्धं लोकभयङ्करम् ॥ अनु॰२.५३ ॥

[४.१०.४. निर्ऋतिः]

राक्षसेशं विशालाक्षं खड्गहस्तं सखेटकम् ।
सिंहारूढं विशालाक्षं रक्तकेशं सुयौवनम् ॥ अनु॰२.५४ ॥
सुदंष्ट्रं नीलवर्णं च कुर्यात्तं निर्ऋतिं ततः ।

[४.१०.५. वरुणः]

शङ्खकुन्देन्दुधवलं पाशहस्तं महाबलम् ॥ अनु॰२.५५ ॥
हारकेयूररुचिरं कुण्डलाभ्यामलङ्कृतम्[६] ।
मकरस्थं महाकूटं कुर्याद्वरुणमुत्तमम्[७] ॥ अनु॰२.५६ ॥

---

१. anu 2.47b द्वारसमायुता] Eds., द्वारसमायुताः F.

२. anu 2.47d क्रमेण तु] F^2, क्रमौ तु F^1.

३. anu 2.48a इन्द्ररूपमहं] F^1, इन्द्रस्यमाहं F^2.

४. anu 2.48c दिव्याकारं बृहद्रूपं] F^2, दिव्यकायं महद्रूप F^1.

५. anu 2.52c महामहिषमारुढं] F^1, महामहिष्टमारूढं F^2.

६. anu 2.56a °रुचिरं] F^2, °रचितं F^1 ; anu 2.56b °भ्या°] F^1, °श्या° F^2.

७. anu 2.56c मकरस्थं महाकूटं] F^2, मकरस्तं हि महारूढं F^1.

[४.१०.६. वायुः]

युवानं वायुं धूम्राभं पिङ्गाक्षं शवरांबरम्[१] ।
कुटिलभ्रुवं महावीर्यं मृगारूढं महाबलम्[२] ॥ अनु°२.५७ ॥
सर्वाभरणसंयुक्तं वायुं कुर्याद्विशेषतः ।

[४.१०.७. कुवेरः]

कुबेरं यक्षराजानं सर्वावयवसुन्दरम्॥ अनु°२.५८ ॥
मकुटेन तु चित्रेण कुण्डलाभ्यामलङ्कृतम्[३] ।
हारकेयूररुचिरं हयारूढं गदाधरं[४] ॥ अनु°२.५९ ॥
रक्तांबरधरं देवं कुर्याद्यक्षेश्वरं प्रभुम्।

[४.१०.८. ईशानः]

ईशानं वृषभारूढं जटामकुटमण्डितम्॥ अनु°२.६० ॥
त्रिशूलपाणिनं देवं त्र्यक्षं लोकेश्वरं हरम्[५] ।
त्रिनेत्रं श्वेतवर्णाभं कुर्यादीशानमुत्तमम्॥ अनु°२.६१ ॥

[४.११. सूर्यः]

सूर्यरूपमहं वक्ष्ये शृणु वह्ने विशेषतः ।
दिव्यरूपं जगत्कान्तिं पद्मकिञ्जल्कमुत्तमम्[६] ॥ अनु°२.६२ ॥
प्रभामण्डलसंयुक्तं कम्बुग्रीवं सुलोचनम्।
उषासन्ध्यासमायुक्तं करण्डमकुटान्वितम्॥ अनु°२.६३ ॥
करोद्धृतं रक्तवस्त्रपीतांबरधरं प्रभुम्[७] ।
सर्वाभरणसंयुक्तं कुर्यादादित्यमुत्तमम्॥ अनु°२.६४ ॥

[४.१२. चन्द्रः]

गोक्षीरधवलप्रख्यं द्विभुजं च द्विनेत्रकम्।
रश्मिमण्डलसंयुक्तं वैपुल्यमकुटान्वितम्॥ अनु°२.६५ ॥
रोहिणीसहितं कुर्याद्वै कुमुदहस्तकम्।

---

१. anu 2.57a युवानं] F^2, युवानां F^1.

२. anu 2.57c °भ्रुवं महा°] SNB., °भ्रूमहारुढ° F^1, °भ्रुममहा° F^2.

३. anu 2.59a मकुटेन तु चित्रेण] F^2, मकुटे तु सवित्रेण F^1 ; anu 2.59b कुण्डलाभ्यामलङ्कृतम्] F^1, कुण्डलाश्यामलङ्कृतम् F^2.

४. anu 2.59d गदाधरं] F^2, भयावहम् F^1.

५. anu 2.61b लोकेश्वरं हरम्] F^1, योगेश्वरं मरम् F^2.

६. anu 2.62c दिव्यरूपं जगत्कान्तिं] F^2, पद्मरूपं जगत्कार्तिं F^1 ; anu 2.62d पद्मकिञ्जल्कमुत्तमम्] F^2, पद्मकिञ्जिल्कसंप्रभम् F^1.

७. anu 2.64a करोद्धृतं] F^2, करोचैयुतं F^1.

[४.१३. विद्येशाः]

अनन्तेशस्तथा सूक्ष्मः शिवोत्तमश्चैकनेत्रकः[१] ॥ अनु°२.६६ ॥
एकरुद्रस्त्रिमूर्तिस्तु श्रीखण्ठश्च शिखाण्डिनः[२] ।
चतुर्भुजास्त्रिनेत्राश्च टङ्कशूलौ च धारिणः[३] ॥ अनु°२.६७ ॥
वरदाभयहस्ताश्च क्षौमवस्त्रधरा इमे।

[४.१४. अश्विन्यौ]

नासत्यौ दस्रकौ चैव अश्विन्यौ च प्रकीर्तितम्[४] ॥ अनु°२.६८ ॥
शुक्लवस्त्रधरोष्णिष पुस्तक +++++।

[४.१५. अष्टमूर्तयः]

भवश्शर्वस्तथेशानः पशुपत्युग्रावेव च[५] ॥ अनु°२.६९ ॥
रूद्रो भीमो महादेवो चाष्टमूर्तिः प्रकीर्तितः[६] ।
चतुर्भुजास्त्रिणेत्रास्तु जटामकुटधारिणः[७] ॥ अनु°२.७० ॥
वरदाभयहस्ताश्च कृष्णापरशुधारिणः[८] ।
सर्वाभरणसंयुक्ता रक्तक्षौमधरा इमे॥ अनु°२.७१ ॥

[४.१६. द्वादशादित्याः]

वैकर्तनो विवस्वांश्च मार्ताण्डो भास्करो रविः[९] ।
लोकप्रकाशकश्चैव लोकसाक्षी त्रिविक्रमः॥ अनु°२.७२ ॥
आदित्यश्च तथा सूर्यः अंशुमाली दिवाकरः[१०] ।
एतावद्वादशादित्यः पद्महस्ता द्विबाहुकाः॥ अनु°२.७३ ॥
रक्तपद्मासनारूढा रत्नमण्डलमण्डिताः[११] ।

---

१. Anu.2.66cd : *v.f.*

२. anu 2.67b श्रीखण्ठश्] F^1, श्रीखण्डश् F^2.

३. anu 2.67c चतुर्भुजास्] Eds., चतुर्भुजस् F.

४. anu 2.68c नासत्यौ दस्रकौ] SNB., नायक सृक्सृकश् F^1, नायकसृसक् F^2 ; anu 2.68d अश्विन्यौ च प्रकीर्तितम्] F^2, अश्विन्ये द्वे प्रकीर्तितः F^1.

५. Anu.2.69d पशुपत्युग्राव्] Eds., पशुपत्युग्रं F.

६. anu 2.70b प्रकीर्तितः] F^1, प्रकीर्तितम् F^2

७. anu 2.70d °धारिणः] SNB., °धारणः F^1, °धारिणा F^2.

८. anu 2.71b °धारिणः] SNB., °धारणः F^1, °धारिणाम् F^2.

९. anu 2.72a वैकर्तनो विवस्वांश्च] F^1, वैकर्तनाविवस्वाश्च F^2.

१०. anu 2.73a तथा] F^2, दिवा F^1 ; anu 2.73b अंशुमाली] F^1, अंशृमाली F^2.

११. anu 2.74a °पद्मा°] F^1, °पक्षा° F^2.

[४.१७. अष्टवसवः]

[१]धरो ध्रुवश्च सोमश्च आपश्चैवनिलोऽनलः[२] ॥ अनु॰२.७४ ॥
प्रत्यूषश्च प्रभावश्च वासवश्चाष्ट एव च।
रक्तवर्णा इमे वीरा खड्गखेटकसंयुताः ॥ अनु॰२.७५ ॥
पीतवस्त्रधराः सर्वे सर्वाभरणभूषिताः।

[४.१८. एकादशरुद्राः]

महादेवो हरो रुद्रः शङ्करो नीललोहितः ॥ अनु॰२.७६ ॥
ईशानो विजयो भीमो देवदेवो भवोद्भवः।
कपालीश इमे सर्वे रुद्राश्चैकादश स्मृताः ॥ अनु॰२.७७ ॥
रुद्रवेषधरा नित्या जटामकुटधारिणः[३]।
कपालशूलहस्ताश्च वरदाभयहस्तकाः ॥ अनु॰२.७८ ॥

[४.१९. पञ्चाप्सरसः]

उर्वशी मेनका रम्भा मोहिनी च तिलोत्तमा[४]।
पञ्च तेऽप्सरसः प्रोक्ताः पीनोन्नतपयोधराः[५] ॥ अनु॰२.७९ ॥
पीनोरुजघनापीना सुनेत्रास्तनुमध्यमाः[६]।
कम्बुग्रीवविभक्ताश्च सर्वाभरणभूषिताः[७] ॥ अनु॰२.८० ॥
सुकेशाः सौम्यवदनाः दुकूलवसनान्विताः।

[४.२०. पितृगणाः]

विरामो महिषश्चैव अग्निष्टुत्वा अमूर्तिकाः[८] ॥ अनु॰२.८१ ॥
सव्या बहूशिकश्चैव अर्यमा सकलस्तया[९]।
एते पितृगणा अष्टौ छत्रदण्डधरास्तथा ॥ अनु॰२.८२ ॥
पीतवर्णाः सुवृध्या तु शुक्लवस्त्रसमन्विताः।

---

१. F^2 omet anu 2.74d-76c.

२. anu 2.74d चैवनिलोऽनलः] Eds. (cf. *Kāraṇa* I.14.26), चैवानलोचनः F^1.

३. anu 2.78a नित्या] F^1, नित्य F^2.

४. anu 2.79b तिलोत्तमा] F^2, तिलोत्तमाः F^1.

५. anu 2.79c पञ्च तेऽप्सरसः] F^1, पञ्चैतेऽप्सरस्यः F^2. ; anu 2.79d पीनोन्नतपयोधराः] F^2, पीतो हत पयोधराः F^1.

६. anu 2.80a पीनोरुजघनापीना] F^2, पीनोरुजङ्घनापीना F^1 ; anu 2.80b सुनेत्रास्तनुमध्यमाः] SNB., सुनेत्रस्तनमध्यमान् F^1, सुनेवास्तनमध्यमाः F^2.

७. anu 2.80c कम्बुग्रीवविभक्ताश्च] SNB., कम्बुग्रीवविभक्तां वा F^2, कम्बुग्रीवमहाम्वास F^1.

८. anu 2.81c विरामो महिषश्चैव] F^1, विरजो मसिषश्चैव F^2 ; anu 2.81d अग्निष्टुत्वा] F^2, अग्निष्वात्वा F^1.

९. anu 2.82a सव्या बहूशिकश्चैव] F^2, सव्यबह्वाशिकेश्चैव F^1.

[४.२१. सप्तर्षयः]

अत्रिर्वसिष्ठोऽङ्गिरसः काश्यपो नारदस्तथा॥ अनु॰२.८३ ॥
उपमन्युर्भृगुश्चैव ऋषयः परिकीर्तिताः[१] ।
जाटावल्कलसंयुक्ताः कमण्डल्वक्षधारिणः॥ अनु॰२.८४ ॥
शुक्लवस्त्रधरोष्णीषाश्शिवध्यानपरायणाः।

[४.२२. सप्तरोहिण्यः]

प्रकीर्तिता जया पूर्णा रोहिणी रेवती मघा[२] ॥ अनु॰२.८५ ॥
रोहिण्यः सप्त उच्यन्ते नागाभरणभूषिताः[३] ।
स्वरूपा नागहस्ताश्च केशहारसमन्विताः॥ अनु॰२.८६ ॥
दिव्यपुष्पधराः सर्वे दुकूलवसनान्विताः[४] ।

[४.२३. अष्टमरुतः]

भगास्थि स्पर्शनो वायुरनिलो मारुतस्तथा[५] ॥ अनु॰२.८७ ॥
प्राणः प्राणीन जीवेश मरुतोऽष्टौ प्रकीर्तिताः[६] ।
द्विभुजाश्च द्विनेत्राश्च अङ्कुशध्वजसंयुताः॥ अनु॰२.८८ ॥
पीताक्षाः पीनवक्षाश्च श्वेतवस्त्रधराः सदा[७] ।

[४.२४. अष्टमहानागाः]

अनन्तो वासुकिश्चैव तक्षकार्कोटकस्तथा॥ अनु॰२.८९ ॥
शङ्खपालश्च गुलिको महापद्मश्च पद्मकः।
पौरुषश्चोर्ध्वकायश्च अधोकायस्तु वालकः[८] ॥ अनु॰२.९० ॥
शिरोपञ्चफणैर्युक्ताः सर्वाभरणभूषिताः।

[४.२५. क्षेत्रपालः]

ऊर्ध्वकेशं विरूपाक्षं शिखाकोटिसमुज्वलम्॥ अनु॰२.९१ ॥
शक्तिशूलधरं देवं कुर्यात्कालाग्निरूपकम्।
सृष्टिरादौ महारुद्रस्त्वष्टा विष्णुर्विशेषतः॥ अनु॰२.९२ ॥

---

१. anu 2.84a उपमन्युर्भृगुश्] SNB., उपमन्युः कुरुश् F[1], उपमन्युकुरुञ् F[2].

२. anu 2.85c जया पूर्णा] SNB., हि जया पूर्णा F[1], हि पूर्णा F[2] ; anu 2.85d रोहिणी रेवती मघा] F[1], रोहिणी श्वेती मखाः F[2]

३. anu 2.86a रोहिण्यः सप्त] F[2], रोहिण्या सप्त F[1].

४. anu 2.87a दिव्यपुष्प॰] F[1], दित्यपुष्प॰ F[2]

५. anu 2.87d वायुरनिलो] F[2], वारमनिलो F[1].

६. anu 2.88b मरुतोऽष्टौ] SNB., मरुदष्टौ F[1], मकदष्टौ F[2].

७. anu 2.89a पीनवक्षाश्] F[2], पीनचक्षाश् F[1].

८. anu 2.90c पौरुषश्चोर्ध्वकायश्च] F[1], पौषश्चोर्ध्वतः काय F[2] ; anu 2.90d अधोकायस्तु वालकः] Eds., आयोकायश्त्वालकः F[1], अधोकायस्तु पालक F[2].

संक्षेपतो महाविष्णुः प्रातःप्रकृतिविग्रहः[१] ।
ईशानाकृतिरूपस्तं स्थाप्य वीर्यं निषिक्तवान्[२] ॥ अनु°२.९३ ॥
तस्मिन्काले महातेजः सर्वशास्त्रार्थचिन्तकः ।
[३]षढस्तपौष्टिकं प्रोक्तं अष्टहस्तं जयप्रदम्[४] ॥ अनु°२.९४ ॥
ब्रह्मचारिस्वरूपेण तस्यां जातो महाबली[५] ।
क्षेत्रपालश्च इत्युक्तं क्षेत्रपाल इति स्मृताः[६] ॥ अनु°२.९५ ॥
द्विहस्तं वश्यकं ज्ञेयं चतुर्हस्तं तु शान्तिकम्[७] ।
शूलं कपालं द्विभुजे घण्टापाशं चतुर्भुजे॥ अनु°२.९६ ॥
खड्गखेटकमाधिक्यं षड्भुजे तु विशेषतः[८] ।
डमरुं चैव खट्वाङ्गं अधिकं चाष्टबाहुके[९] ॥ अनु°२.९७ ॥
[१०]ऊर्ध्वकेशं विरूपाक्षं भीमरूपं वृकोदरम्।
नागाभरणसंयुक्तं नग्नरूपं महाबलम्[११] ॥ अनु°२.९८ ॥
क्षेत्रं च कारयेदेवं नागयज्ञोपवीतिनम्।

[४.२६. कामः]

कामरूपमहं वक्ष्ये रतियुक्तं सुयौवनम्॥ अनु°२.९९ ॥
वृत्तं ललाटनयनं दुकूलवसनान्वितम्।
सर्वाभरणसंयुक्तं हारकेयूरभूषितम्॥ अनु°२.१०० ॥
इक्षुचापसमायुक्तं पञ्चबाणसमायुतम्।

---

१. anu 2.93b °विग्रहः] F^1, °विग्रहम् F^2.

२. anu 2.93c °रूपस्तं स्थाप्य] F^1, °रूपस्यः तस्य F^2 ; anu 2.93d निषिक्तवान्] F^2, निक्षिप्तवान् F^1.

३. F^1 place anu 2.94cd après 96ab.

४. anu 2.94c षढस्त°] F^1, षट्सप्त° F^2.

५. anu 2.95b तस्यां जातो महाबली] F^2, तस्य जातो महाबलः F^1.

६. anu 2.95c °श्च इत्युक्तं] F^2, °बहुस्तुत्यं F^1.

७. anu 2.96a द्विहस्तं वश्यकं ज्ञेयं] F^2, महास्तकं पश्यकज्ञेयं F^1.

८. anu 2.97b षड्भुजे] F^2, षड्भुजं F^1.

९. anu 2.97c डमरुं चैव खट्वाङ्गं] SNB., डमरुं चेत्तु खट्वाङ्गं F^1, उमरुश्चे तु खड्गाङ्गम् F^2.

१०. F^1 donne la version suivante de anu 2.98ab : ऊर्ध्वके ऊर्ध्वकेशं विरूपाक्षं भीमरूपं।

११. anu 2.98d नग्नरूपं] SNB., अनन्तरूपं F^1, नन्दरूपं F^2.

१कारयेल्लक्षणोपेतं सर्वकामफलप्रदम्॥ अनु°२.१०१ ॥
प्रतिमालक्षणं प्रोक्तं स्त्रीणां मानमथ शृणु२ ।

[अनुबन्धौ समाप्तौ]

१. F^2 omet anu.2.101c-102a.

२. anu 2.101b स्त्रीणां] F^2, पितृना F^1.

[सप्तदशः पटलः]
[देवीलक्षणम्][१]

[२]अथातः संप्रवक्ष्यामि उमादेव्यास्तु लक्षणम्[३] ।
[४]उमा दुर्गा च लक्ष्मी च चामुण्डा च मही तथा[५] ॥ १ ॥
ब्राह्मी ज्येष्ठा च रौद्री च वैष्णवी च सरस्वती[६] ।
मध्यमदशतालेन कारयेत्तु विचक्षणः[७] ॥ २ ॥

[१. देवीकायमानम्]

मूर्धपादान्तयोर्मध्ये मानं तत्र निबोधयेत्[८] ।
उष्णीषमङ्गुलं प्रोक्तं त्र्यङ्गुलं शिर उच्यते[९] ॥ ३ ॥
केशान्तादक्षिसूत्रान्तं पञ्चाङ्गुलमिति स्मृतम्।
अक्षिसूत्रात्पुटान्तं तु चतुर्मात्रार्धमिष्यते[१०] ॥ ४ ॥
[११]नासिकाद्धनुपर्यन्तमर्धाधिक्यं त्रयङ्गुलम्[१२] ।
गलवृद्धिर्न कर्तव्या ग्रीवायां चतुरङ्गुलम्[१३] ॥ ५ ॥

---

१. Manuscrits utilisés : A^1, A^2, B^1, B^2, B^3, C^1, C^2, D^1, D^2, F^1, F^2, G.

२. C^1 : lacune correspondant au début du chapitre (1ab-13ab, suite de la lacune du chapitre 16). F. remplace 1ab par : अतः परं प्रवक्ष्यामि स्त्रीमानं सुविशेषतः।

३. 1b उमादेव्यास्तु लक्षणम्] A, B^{1-3}, D, G, मदेव्या लक्षणं परम् C^2.

४. 1cd-2c=16.25cd-26c.

५. 1cd : F met les noms à l'accusatif (1cd-2ab) ; 1d चामुण्डा] A, B^{1-3}, G, चामुण्डी C^2, D, F ; मही तथा] A, B^{1-3}, C^2, D, G, महिवृषाम् F^1, महीमुषाम् F^2.

६. 2a ब्राह्मी ज्येष्ठा च रौद्री] A, B^{1-3}, G, ब्रह्मणी चेन्द्ररौद्री C^2, ब्रह्मणी चेन्द्र +रेन्द्री D^1, ब्रह्मणी चेन्दुरेन्द्री D^2, ब्रह्माणी ज्येष्ठरौद्री F^1, ब्रह्माणी ज्येष्ठरेदी F^2.

७. 2c मध्यमदशतालेन] A(etc.), मध्यमा दशमं ताले B^1, मध्यं दशतालेन B^3.

८. 3a °पादान्तयोर्मध्ये] B^{1-3}, D, G, °पादं तयोर्मध्ये A, C^2, °पादं तयोर्मानं F ; 3b मानं तत्र निबोधयेत्] A, B^{1-3}, G, मानं तत्र निबोध मे C^2, D, स्त्रीषु सर्वे निबोध मे F.

९. 3d त्र्यङ्गुलं] A, B^{1-2}, C^2, D, F^2, अङ्गुलं B^3, द्वयङ्गुलं F^1, G.

१०. 4c अक्षिसूत्रात्पुटान्तं तु] A, B^{1-3}, G, ज्ञात्वाक्षिसूत्रात्स्फुटाच् C^2, वरङ्क(?)क्षिसूत्रान्तं स्पष्टान्तं D^1, ऋत्वक्षिसूत्रात्स्फुटान्तं D^2, अक्षिसूत्रात्पुटान्तं हि F ; 4d °मिष्यते] A, B^{1-3}, G, °मुच्यते C^2, D, एव च F.

११. F^2 omet les vers 5ab-6ab.

१२. 5a नासिकाद्धनुपर्यन्तम्] A^1, B^{1-3}, C^2, D^2, G, नासिकार्धं तु पश्यन्तं D^1, नासिकामधनुवत्यन्तम् F^1 ; 5b °क्यं त्रयङ्गुलम्] C^2, °क्यं त्र्यङ्गुलम् A^1, B^2, D^2, G, °क्यत्रयं बलम् B^1, °क्यात्रयङ्गुलम् B^3, °क्यं त्र्यङ्गुलम् D^1, °कं स्यात्र्यङ्गुलम् F^1.

१३. 5c °वृद्धिर्न कर्तव्या] C^2, °वृत्ति न कर्तव्यं A, B^{1-2}, G, °वृत्ति न कर्तव्या B^3, °वृद्धिं न

हिक्कासूत्रात्स्तनान्तं च त्रयोदशाङ्गुलमिष्यते[१] ।
अधस्तान्नाभिसीमान्तं तत्समं कारयेद्बुधः[२] ॥ ६ ॥
नाभिसीमात्स्वयोन्यन्तं द्वादशाङ्गुलमिष्यते[३] ।
तद्योन्या जानुसीमान्तं षड्विंशत्यङ्गुलायतम्[४] ॥ ७ ॥
जानुमण्डलं भागं स्याज्जङ्घा चोरू च तत्समम्[५] ।
तलोत्सेधं चतुर्मात्रमूर्ध्वमानं प्रकीर्तितम्[६] ॥ ८ ॥

[२. देव्यनुकायमानम्]

[२.१. पादमानम्]

[७]तत्पार्ष्णी चतुरङ्गुल्यं पुरस्ताद्द्वादशाङ्गुलम्[८] ।
पादाग्रं पञ्चमाङ्गुल्यम् उत्सेधं चतुरङ्गुलम्[९] ॥ ९ ॥
पादाङ्गुष्ठायतं भागं प्रादेशिन्यास्तु तत्समम्[१०] ।
त्रिमात्रार्धं मध्याङ्गुल्यं त्र्यङ्गुलानामिका भवेत्[११] ॥ १० ॥

कर्तव्यं D, गुलवृद्धिं न कर्तव्यं F^1 ; 5d ग्रीवायां] Eds., ग्रीवाया A, B^1, ग्रीवयं B^2, D, G, ग्रीवया B^3, ग्रीवयां C^2, ग्रीवा F^1.

१. 6b °मिष्यते] A, B^{1-3}, D, G, भवेत् C^2, एव च F^1.

२. 6c अधस्तान्नाभिसीमान्तं] A^2, B^{1-3}, C^2, D^2, G, अधस्तान्नाभिसीमान्ते A^1, अधस्तं नाभिसीमान्तं D^1, F^1.

३. 7a स्वयोन्यन्तं] A, B^{1-3}, C^2, D, °योग्यन्तं F^1, +योन्यन्तं F^2, स्वधोन्यं तद् G ; 7b °मिष्यते] A, B^{1-3}, G, °मङ्गुलम् C^2, D.

४. 7c तद्योन्या जानुसीमान्तं] B^{1-3}, C^2, D, G, तव्योन्या जानुसीमान्तं A, तस्योज्ञान्वानुपर्यन्तं F^1, तस्योर्जं जानुपर्यन्तं F^2 ; 7d षड्विंशत्यङ्गुलायतम्] C^2, D^1, F, षड्विंशत्यङ्गुलायतम् A, D^2, G, षड्विंशद्व्यङ्गुलायतम् B^{1-3}.

५. 8a जानुमण्डलं भागं स्यात्] A, B^{1-3}, C^2, D, G, तज्ञानुमण्डलं बाहु F ; 8b जङ्घा चोरू च तत्समम्] A, B^{1-3}, C^2, G, जङ्घां चोरु तत्समम् D, जङ्घायां चोरु तत्समम् F.

६. 8c तलोत्सेधं चतुर्मात्रम्] A, B^{1-3}, D, F, G, तलोच्चं चतुर्मात्रार्धम् C^2 ; 8d °मानं] A, B^{1-3}, C^2, D, G, °कायं F.

७. D^2 omet 9b-10c.

८. 9a पार्ष्णी] A, B^{1-3}, C^2, D^1, G, पार्ष्णीं D^2, पाणी F ; 9b पुरस्ताद्द्वादशाङ्गुलम्] A, B^{1-3}, C^2, F, G, पुरस्ताचा दशाङ्गुलम् D^1.

९. 9c पादाग्रं] A, B^{2-3}, C^2, G, पादाश्रं B^1, पादाग्रः D^1, पादाग्रात् F.

१०. 10b प्रादेशिन्यास्तु] A, B^{1-3}, G, प्रवेशिन्यास्तु C^2, प्रदेन्योष्ट D^1, देन्योङ्गुष्ठ F^1, देशिन्याङ्गुष्ठ F^2.

११. 10c त्रिमात्रार्धं मध्याङ्गुल्यं] D^1, त्रिमात्रमध्यमाङ्गुल्यं A^1, त्रिमात्रार्धं मध्यमाङ्गुल्यं (*v.f.*) A^2, मध्याङ्गुल्यत्रिमात्रार्धं B^{1-3}, C^2, G, द्वयङ्गुल्यमध्यमाङ्गुल्यम् F^1, द्व्यङ्गुलं मध्यमाङ्गुल्यम् F^2 ; 10d त्र्यङ्गुलानामिका] A, B^{1-3}, D^1, G, त्र्यङ्गुलनामिका C^2, अर्धमाङ्गुल्यमाधिकम् F^1,

[१]कनिष्ठायां द्विमात्रार्धं पादाङ्गुल्यायतं भवेत्[२] ।
द्वादशं च नवाष्टं च सप्तार्धं षड्यवं तथा[३] ॥ ११ ॥
अङ्गुष्ठादिकनिष्ठान्तं पादाङ्गुल्यस्य विस्तृतम्[४] ।
[५]तत्तदङ्गुलविस्तारं तदर्धं नखविस्तृतम्[६] ॥ १२ ॥
अक्षात्पार्ष्ण्यायतं भागमुत्सेधं तु कला भवेत्[७] ।

[२.२. जङ्घादिमानम्]

अक्षगुल्फद्वयोर्मध्ये विस्तारं पञ्चमाङ्गुलम्[८] ॥ १३ ॥
नलप्रदेशविस्तारं चतुरङ्गुलमिष्यते[९] ।
जङ्घामध्यमविस्तारं षण्मात्रं तु प्रकीर्तितम्[१०] ॥ १४ ॥
जानुमध्यमविस्तारं सप्ताङ्गुलमिति स्मृतम्[११] ।
[१२]ऊरुमध्यमविस्तारं त्रिभागाङ्गुलहीनकम्[१३] ॥ १५ ॥

अर्धमाधिकमाङ्गुलम् F^2.

१. F^1 et F^2 remplacent 11ab par : द्व्यङ्गुलानामिका द्व्यङ्गुलार्धकनिष्ठका। (*v.f.*).

२. 11a कनिष्ठायां] A^1, G, कनिष्ठयामन् A^2, कनिष्ठाया B^{1-3}, कानिष्ठायामं C^2, कनिष्ठायाम D.

३. 11c नवाष्टं] A, B^{1-3}, D, G, नवाष्टे C^2, F ; 11d सप्तार्धं षड्यवं] A(etc.), सप्ताष्टं षड्यवस् F^1.

४. 12b °स्य विस्तृतम्] A, B^{1-3}, D, °स्य विस्तरम् C^2, G, विशेषतः F.

५. B^3, C^2 et D omettent 12cd.

६. 12d नखविस्तृतम्] G, नवविस्तृतम् A, B^{1-2}, C^2, स्याद्विस्तृतम् F.

७. 13a अक्षात्पार्ष्ण्यायतं] A, B^{2-3}, C^2, D^1, G, अक्षात्पार्ष्ण्यायतं B^1, F^1, अक्ष्यात्पार्ष्ण्यायतं D^2, अक्षास्त्वाष्ट्यायतं F^2 ; 13b उत्सेधं तु] A, B^2, C^2, D^2, F, G, उत्सेधान्त B^1, उत्सेधान्तु B^3, तत्सैधं D^1.

८. 13c अक्षगुल्फद्वयोर्मध्ये] Eds., अक्षङ्गुल्फद्वयोर्मध्ये C, D^2, G, अक्ष्यङ्गुदल्पयोर्मध्ये A^1, अक्ष्यङ्गुलयोर्मध्ये A^2, अक्ष्यङ्गुल्फयो मध्ये D^1, अक्षङ्गुल्फद्वयोर्मध्यं F.

९. 14a नलप्रदेशविस्तारं] SNB., न तु प्रदेशविस्तारं A, B^{1-3}, C^1, D^1, G, त नु प्रदेशविस्तारान् C^2, ननुल प्रदेशविस्तार D^2, नलकन्दलविस्तारं F ; 14b चतुरङ्गुलमिष्यते] B^{1-3}, ++अङ्गुल्यमिष्यते A, त्रिभागमङ्गुलहीनकम् (*v.f.*) C, +++गुलमिष्यते D, G, चतुरङ्गुलमेव च F.

१०. 14c जङ्घामध्यम°] A(etc), जङ्घायामस्य F ; 14d षण्मात्रं तु प्रकीर्तितम्] A, C, D^2, G, षण्मात्रं तु विधीयते B^{1-3}, षण्मात्रेन प्रकीर्तितम् D^1, षण्मात्रं समुदीरितम् F.

११. 15b सप्ताङ्गुलमिति स्मृतम्] A(etc.), सप्ताद्व्यङ्गुलमेव च F.

१२. A^1 omet 15cd-18cd. A^2, B^{1-3} et G omettent 15cd-17ab.

१३. 15d त्रिभागाङ्गुलहीनकम्] C, D, रुद्राकुलकमेव च F^1, रुद्राङ्गुलक्रमानतः F^2.

ऊरुमूलस्य विस्तारं चतुर्भागाङ्गुलक्षयम्[१] ।
गजहस्तं यथाकारं नलका चोरुमूलयोः[२] ॥ १६ ॥
योनिमूलस्य विस्तारं पञ्चाङ्गुलमिति स्मृतम्।
[३]अग्रैकमङ्गुलं तारमानुपूर्वक्षयं क्रमात्[४] ॥ १७ ॥
पिप्पलस्य दलाकारं तद्योन्याकृतिरुच्यते[५] ।
कटिप्रदेशविस्तारमष्टाविंशतिरङ्गुलम्[६] ॥ १८ ॥
श्रोणीप्रदेशविस्तारं षड्विंशत्यङ्गुलं भवेत्[७] ।
नाभिप्रदक्षिणावर्तं षड्यवं विस्तृतं भवेत्[८] ॥ १९ ॥
निम्नं यवद्वयं विद्यान्नाभिकामानमिष्यते[९] ।
उदरं मध्यविस्तारमुक्तमेकादशाङ्गुलम्[१०] ॥ २० ॥
स्तनान्तं तस्य विस्तारं चतुर्दशाङ्गुलं भवेत्[११] ।
स्तनमण्डलविस्तारं नवमात्रार्धमिष्यते[१२] ॥ २१ ॥

---

१. 16a ऊरुमूलस्य] C, F, ऊरुद्यङ्गुलस्य (?) D^1 ; 16b भागाङ्गुलक्षयम्] C^1, D^2, F^2, भागं कुलक्षयम् C^2, F^1, भागाङ्ककलक्षयम् D^1.

२. 16c यथा°] F, तथा° C^2, D ; 16d चोरुमूलयोः] F, चाभ्रशूलयोः C^1, चारुमूलयोः C^2, D^2, चार्धमूलयोः D^1.

३. F^1 et F^2 intercalent entre 17ab et 17cd un demi-vers composé de 17c suivi de 17b.

४. 17c अग्रैकमङ्गुलं] A^2, $B^{1,3}$, F, G, सुश्रैकमङ्गुलं C, D ; 17d आनुपूर्वक्षयं क्रमात्] B^2, C, D^2, आनुपूर्व्यात्क्षयं क्रमात् A^2, B^{1-2}, G, अनुं पूर्वक्षयीं क्रमात् D^1 आनुपूर्वत्क्रमक्षयम् F.

५. 18b तद्योन्याकृतिरुच्यते] A^2, G, तद्योनिश्चाकृतिर्भवेत् D, F.

६. 18c °प्रदेश°] A^2, B^{1-3}, C, D, G, °प्रदेशे F ; 18d अष्टाविंशतिरङ्गुलम्] A^2, B^{1-3}, C, D, G, अष्टाविंशति चाङ्गुलम् F.

७. 19a °प्रदेश°] A(etc.), °प्रदेशे F ; 19b षड्विंशत्यङ्गुलं] A,(etc.), षड्विंशद्यङ्गुलं F^1.

८. 19c नाभि°] A^2, C, D, F^1, नाभ° A^1, न हि B^{1-3}, नाभिः F^2, G ; 19d षड्यवं विस्तृतं भवेत्] A, G, षड्यवं विस्तारं भवेत् B^{1-3}, षड्यवं विस्तृतायतम् C, F^2, षड्वींश विस्तृतायतम् D, षड्विंशस्तृतायतम् F^1.

९. 20a यवद्वयं] A(etc.), यवक्षयं F ; 20b नाभि°] A^2, B^{1-3}, C, D, F, G, नाभ° A^1.

१०. 20d उक्तमे°] A(etc.), उत्तरे° F.

११. 21a स्तनान्तं तस्य विस्तारं] G, स्तनं तदस्य विस्तारं A, स्तनतटस्य विस्तारं B^{1-3}, स्तनत++विस्तारम् C, स्तनस्तटाश्रवविस्तारं D, चतुर्दशाङ्गुलं तामस्त F^1, चतुर्दशाङ्गुलन्तारं F^2 ; 21b चतुर्दशाङ्गुलं भवेत्] B^{1-3}, चतुर्दशाङ्गुलमेव च (*v.f.*) A, C, D, G, नताटस्य षस्तृतम् F^1, स्तरताडस्य विस्तृतम् F^2.

१२. 21c स्तनमण्डल°] A(etc.), मण्डलस्य तु F.

तत्समायतमेवोक्तं तदर्धं स्यात्तदुन्नतम्[१] ।
द्वियवार्धं चूचुकं तारं द्व्यङ्गुलं स्तनमण्डलम्[२] ॥ २२ ॥
[३]नालिकेरफलाकारं रमणीयं स्तनद्वयम्[४] ।

[२.३. बाह्वादिमानम्]

[५]कक्षयोरन्तरं तिर्यगष्टादशाङ्गुलं भवेत्[६] ॥ २३ ॥
बाहुद्वयान्तरं तिर्यग्द्वात्रिंशाङ्गुलमीरितम्[७] ।
हिक्कासूत्रादधो बाहुष्षड्विंशाङ्गुलमायतम्[८] ॥ २४ ॥
प्रकोष्ठं विंशदङ्गुल्यं मानमेतन्न संशयः[९] ।
कराग्रान्मध्यमाङ्गुल्यायामं द्वादशमुच्यते[१०] ॥ २५ ॥
तस्यार्धं तु तलायामं शेषं मध्याङ्गुलं भवेत्[११] ।

---

१. 22a तत्समायतमेवोक्तं] A(etc.), तत्समायतमत्रोक्त F ; 22b स्यात्तदुन्नतम्] A, B^{1-3}, G, स्यादुन्नतं विदुः (*v.f.*) C^1, D, उन्नतं विदुः C^2, स्यात्स्तनोन्नतम् F.

२. 22c द्वियवार्धं चूचुकं तारं] (*v.f.*) A^2, B^2, G, द्व्यवार्धं चूचुकं तारं A^1, B^3, C, D^2, द्वियवार्धचुकं तार B^1, दायवार्धं च द्यकं तारं (?) D^1, द्व्यचूचकतारं हि F^1, द्वयचुचुकतारं हि F^2.

३. F^1 et F^2 omettent 23ab.

४. 23a नालिकेर॰] A, B^{2-3}, C, D^1, नरिकेल॰ B^1, G, नलिकेरा॰ D^2.

५. C^2 omet 23d-24a.

६. 23c ॰रन्तरं तिर्यग्] A, B^{1-2}, G, ॰रन्तिर्य B^3, ॰रन्तरं त्यक्त्वा C, ॰रन्तरं तत् D^1, ॰रन्तरं त्यक् D^2, लचुने F^1, ॰रन्तरं त्र्यर्गम् F^2.

७. 24a बाहुद्वयान्तरं तिर्यग्] A, B^{1-3}, G, बाहुमूलान्तरं त्यक्त्वा C^1, बाहुद्वयान्तं त्यक्त्वा D^1, बाहुद्वयान्तरन्यर्थ(?) D^2, बह्वयोरन्तरं त्र्यक F^1, बाहूयोरन्तर त्र्यक् F^2 ; 24b द्वात्रिंशाङ्गुलमीरितम्] A(etc.) द्वात्रिङ्गुलमिति स्मृतम् F^1.

८. 24c ॰सूत्रादधो] C, G, ॰सूत्रादयो A, B^{1-3}, D, ॰सूत्रो द्वयो F^1, ॰सूत्रोदयो F^2 ; 24d षड्विंशाङ्गुलमायतम्] A, C, D, F^2, G, षडंशाङ्गुलमायतम् B^{1-3}, षड्विंशत्यङ्गुलमायतम् F^1.

९. 25a प्रकोष्ठं विंशदङ्गुल्यं] A, B^{1-3}, F^2, G, प्रकोष्टविंषत्यङ्गुल॰ C^1, प्रकोष्ठविंषत्यङ्गुल्यं C^2, D, F^1 ; 25b मानमेतन्न संशयः] A, B^{1-3}, C^1, D^2, F, G, मानमेव तन्न संशयः (*v.f.*) C^2, मानमेतन्न संशयम् D^1.

१०. 25c कराग्रान्मध्यमाङ्गुल्या॰] A^1, G, करग्रामध्यमाङ्गुल्या॰ A^2, D^1, कराग्रामध्यमाङ्गुल्यं $B^{1,3}$, कराग्रामर्धमाङ्गुल्यां B^2, कराग्रान् मध्याङ्गुला C, कराग्रा मध्याङ्गुला D^2, अग्राजमध्यमाङ्गुला F^1, अग्रा मध्याङ्गुला F^2 ; 25d ॰यामं द्वादशम्] A, B^3, ॰यामद्वादशम् B^{1-2}, G, ॰यामं द्वादशाङ्गुलम्(*v.f.*) C, D, F.

११. 26a तस्यार्धं तु तलायामं] A, B^{1-3}, G, तस्यार्धस्तु तिला यामं C, तस्यार्धस्तु तला यामं D, तस्योर्ध्वं तु तलायामं F ; 26b ॰ङ्गुलं भवेत्] A, B^{1-3}, C, D^1, G, ॰ङ्गुलिं भवेत् D^2, ॰ङ्गुलस्तथा F^1, ॰ङ्गुला स्थिताः F^2.

आयामं च प्रदेशिन्या भागं पञ्चयवाधिकम्[१] ॥ २६ ॥
द्विकोलं षड्यवाधिक्यं आयामानामिका भवेत्[२] ।
भागायतं कराङ्गुष्ठं कनिष्ठं तत्समायतम्[३] ॥ २७ ॥
यवैर्दश च सप्तार्धमष्टसप्तार्धषड्यवम्[४] ।
अङ्गुष्ठादि कनिष्ठान्तं पञ्चाङ्गुलविशालकम्[५] ॥ २८ ॥
मूलादग्रं क्षयं तारमष्टभागविहीनकम्।
सप्तार्धं चतुरर्धं च पञ्चार्धं चतुरर्धकम्[६] ॥ २९ ॥
त्रियवाश्च नखा ज्ञेया विस्तारा आनुपूर्विका[७] ।
विस्तारं द्वियवाधिक्यं नखायामं च कारयेत्[८] ॥ ३० ॥
त्रिपर्वं चतुरङ्गुल्यमङ्गुष्ठात्तु द्विपर्वकान्[९] ।

---

१. 26c प्रदेशिन्या] A, C, D, F^1, G, प्रदेशिन्यां B^{1-3}, F^2 ; 26d पञ्चयवाधिकम्] A, B^{1-3}, C, D, F^2, G, पयवायतम् (?) F^1.

२. 27a द्विकोलं षड्] A^1, B^{1-3}, द्विकोलषड् F^2, द्विकोलकं षड् A^2, C, D, G, द्विकोलष्ट F^1 ; 27b आयामानामिका] A, B^{1-3}, C, D, G, आयामोऽनामिका F.

३. 27c भागायतं कराङ्गुष्ठं] A, B^{1-3}, F^2, G, भागायतकराङ्गुष्ठं C, F^1, भायातकराङ्गुष्ठ D^1, भापायतकराङ्गुष्ठ D^2 ; 27d कनिष्ठं तत्समायतम्] A^2, B^2, C^1, G, कनिष्ठं तत्समायुतम् A^1, $B^{1,3}$, C^2, कनिष्ठासमायतम् D, F^2, कनिष्ठसमायुतम् F^1.

४. 28a यवैर्दश च सप्तार्धम्] A, B^2, D, यवैर्दश च सप्तार्धं B^1, C^2, यवैर्दश च सप्ताष्ट B^3, यववैर्दश च सप्तार्धं C^1, दर्शधा वाच्य सप्तार्थं F^1, दर्शयाऽवाच्य सप्तार्धं F^2, य+दश च सप्तार्धम् G ; 28b अष्टसप्तार्धषड्यवम्] A, B^{1-2}, C, D, G, सप्तद्वषड्यवकम् B^3, षड्सप्तार्धं च षड्यवम् F.

५. 28d °विशालकम्] A, B^{1-3}, D, G, °वशाधिकम् C, °विशालतः F.

६. 29c चतुरर्धं] A, B^{2-3}, C^2, G, चतुरश्रं B^1, चतुरार्धं C^1, D, F ; 29d चतुरर्धकम्] A, B^{2-3}, C^2, G, चतुरश्रकम् B^1, चतुरार्धकम् D, F.

७. 30a त्रियवाश्च नखा] B^2, त्रियवा च नखा A^1, त्रियवाश्व नखा A^2, त्रियवं च नखा B^1, G, +++च नखा B^3, त्रियवाश्च तयोर् C, त्रियवश्च तयो D, त्रिधा पाचनखा F ; 30b विस्तारा आनुपूर्विका] A, D^1, G, विस्तारार्थानुपूर्वकम् B^1, विस्तारा अनुपूर्विकम् B^{2-3}, C^1, विस्तारानुपूर्वकम् C^2, विस्तारा विस्तारा अनुपूर्वका D^2, विस्तारादशपूर्वशः F^1, विस्तारादनुपूर्वशः F^2.

८. 30c विस्तारं द्वियवाधिक्यं] A, B^{1-3}, C^1, G, विस्तारा द्वियवाधिक्यं C^2, विस्तारद्वङ्गुलाधिक्यं D^1, विस्तरद्वयङ्गुलाधिक्यन् D^2, विस्तारद्वयवाधिक्य F ; 30d नखायामं च कारयेत्] A, B^{1-3}, C^2, D^2, G, नखायामं च ++येत् C^1, नखां यामं च करयेत् D^1, नवायमातिरितम् F^1, नवायाममितीरितम् F^2.

९. 31a त्रिपर्वं चतुर्] F^1, त्रिपर्ववेदम् A, B^{1-3}, C, D^1, G, त्रिपूर्ववेदम् D^2, त्रि+वा चतुर् F^2 ; 31b अङ्गुष्ठात्तु द्विपर्वकान्] F, अष्टाङ्गुलं तु पूर्वकम् A^1, B^2, अष्टाङ्गुलं तु पर्वकम् A^2, $B^{1,3}$, C, D^2, G, अष्टाङ्गुलं च पूर्वकम् D^1.

तलमध्ये ततो रेखा पाशाङ्कुशसमन्वितम्[१] ॥ ३१ ॥
मणिबन्धस्य विस्तारं त्र्यङ्गुलं स्यात्प्रमाणकम्[२] ।
[३]मूलादग्रक्षयं तारमष्टभागविहीनकम्[४] ॥ ३२ ॥
प्रकोष्ठमध्यविस्तारं चतुरङ्गुलमिष्यते[५] ।
कोर्परस्य प्रमाणं तु पञ्चाङ्गुलं यवाधिकम्[६] ॥ ३३ ॥
[७]बाहुमध्यमविस्तारं षण्मात्रं परिकीर्तितम्[८] ।
बाहुमूलस्य विस्तारं सप्तार्धमङ्गुलं भवेत्[९] ॥ ३४ ॥
हिक्कासूत्रोपरि चैव स्कन्धपर्यन्तमिष्यते[१०] ।
कोलकं कोलकार्धं च अङ्गुलार्धं क्षयं भवेत्[११] ॥ ३५ ॥
[१२]गजहस्ताकारमुक्तं बाह्वोरुपरि कीर्तितम्[१३] ।

---

१. 31c °मध्ये ततो] A, B^{1-3}, G, °मध्ये गता C, °मध्ये ग+ D^1, °मध्ये गतो D^2, °मध्यगता F ; 31d पाशाङ्कुशसमन्वितम्] A, B^3, C, G, पदशाङ्कुरसमन्वितम् B^{1-2}, पयाङ्कुशसमन्वितम् D, पाशाङ्कुशसरोरुहाः F.

२. 32b त्र्यङ्गुलं स्यात्प्रमाणकम्] A, G, त्र्यङ्गुलस्य प्रमानकम् B^{1-3}, त्र्यङ्गुलं स्यात्प्रमाणतः C^1, D^1, अङ्गुलं स्यात्प्रमाणतः C^2, त्र्यङ्गुल्यः स्यात्प्रमाणतः D^2, मध्याङ्गुल प्रमाणतः F.

३. F^1 et F^2 remplacent 32cd par la répétition de 29ab.

४. 32c मूलाद्] A, B^{1-3}, C, D, कुर्याद् G.

५. 33a प्रकोष्ठमध्य°] A, B^{2-3}, G, कोष्ठमध्यम° C, D, F^2, प्रकोष्ठं मध्य° B^1, कोष्ठविघम° F^1 ; 33b इष्यते] A(etc.), उच्यते F.

६. 33c कोर्परस्य] A, B^{1-3}, C, D^2, F, G, कर्पुरस्य D^1 ; प्रमाणं तु] A, B^1, C, D, G, प्रमाणेन B^2, प्रा+++ B^3, तु विस्तारं F ; 33d पञ्चाङ्गुलं यवाधिकम्] A, B^{1-3}, C^2, G, पञ्चाङ्गुल +++कम्· C^1, पञ्चास्याङ्गुलं तु यवाधिकम् D, पञ्चार्धं च यवाधिकम् F.

७. D^1 omet 34b et 34c.

८. 34b परिकीर्तितम्] A, B^{1-3}, C, D^2, G, समुदीरितम् F.

९. 34d सप्तार्धमङ्गुलं] G , अष्टसप्ताङ्गुलं A^1, सप्तमाङ्गुलं A^2, सप्तार्धार्धाङ्गुलं B^{1-3}, सप्ताङ्गुलं C, सप्तार्धं चाङ्गुलम् D^1, सप्तार्धाङ्गुलं D^2, सार्धसप्ताङ्गुलं F.

१०. 35a °परि चैव] A^2, °परिश्चैव B^{1-3}, G, °परि ग्ये च A^1, °पर्यैव C, °परियैव D, °परि षथा (?) F^1, °परि था (?) F^2 ; 35b स्कन्ध°] B^{1-3}, D^1, F^2, स्कन्द° A, C, D^2, G, स्यन्द° F^1.

११. 35c कोलकार्धं च] A, B^{1-3}, C, D^2, F, G, कोलकं चार्धं D^1 ; 35d अङ्गुलार्धं क्षयं] C, D^2, अङ्गुलाध्यक्षयं A^1, अङ्गुलार्धक्षयं A^2, B^{1-3}, G, चाङ्गुलार्धक्षयं D^1, मङ्गुलार्धक्षयो F^1 अङ्गुलार्धक्षयो F^2.

१२. F^1 et F^2 omettent 36ab.

१३. 36a °हस्ताकारमुक्तं] C^2, °हस्तकारमेवोक्तं (*v.f.*) A, °हस्ताकृतिं चैव $B^{1,3}$, °हस्तकृतिश्चैव B^2, °हस्ताकारमेवोक्तं (*v.f.*) C^1, D, G ; 36b बाह्वोरु परिकीर्तितम्] B^{2-3},

[२.४. ग्रीवामानम्]

षण्मात्रं ग्रीवविस्तारं सुवृत्तं ग्रीवमुच्यते[१] ॥ ३६ ॥
[२]त्र्यङ्गुलाद्बियवाधिक्यं चिबुकस्य तु निर्गमम्[३] ।
अङ्गुलद्बियवाधिक्यमधो मध्यायतं भवेत्[४] ॥ ३७ ॥

[२.५. वक्त्रमानम्]

हनुश्च षड्यवा ज्ञेया अधरोष्ठस्य निर्गमम्[५] ।
अधरोष्ठस्य विस्तारमङ्गुलं स्याद्यवाधिकम्[६] ॥ ३८ ॥
तिर्यक् च कोलका ज्ञेया रक्तभागमिति स्मृतम्[७] ।
[८]अधरोष्ठस्य विस्तारं मध्यमं यावकं विदुः[९] ॥ ३९ ॥
[१०]शेषं हि रक्तधारं च अधरोष्ठं प्रशस्यते[११] ।
तिर्यक्त्र्यङ्गुलार्धं च आस्यतारमिति स्मृतम्[१२] ॥ ४० ॥

G, बाह्योरु परिकीर्तितम् A, B^{1}, बाहोरुपरि कीर्तितम् C^{2}, बाहुरि +परिकीर्तितम् C^{1}, बाहुरुपरि कीर्तितम् D.

१. 36d सुवृत्तं ग्रीवमुच्यते] A, B^{1-3}, C, G, सुवृत्त+ग्रीवमेव च D, ग्रीवं सुवृत्तमेव च F.

२. F^{1} omet 37b-37c ; F^{2} omet 37ab.

३. 37a त्र्यङ्गुलाद्] A, B^{1-3}, D, G, अङ्गुलाद् C ; द्बियवाधिक्यं] Eds., द्ब्यङ्गुलाधिक्यं A(etc.).

४. 37c अङ्गुलद्बियवाधिक्यम्] A^{2}, B^{1-2}, G, lacune A^{1}, अङ्गुलद्ब्यवाधिक्यम् B^{3}, lacune C^{1}, अङ्गुलद्ब्याण्गुलाधिक्य C^{2}, अङ्गुलद्ब्यङ्गुलयवाधिक्यम् D, अङ्गुलं द्ब्यङ्गुलाधिक्य F^{2} ; 37d अधो मध्यायतं] C, मूलस्य तमं A^{1}, महोस्यायतं A^{2}, +हो स्यायतं B^{1-3}, महो मस्थथनम् D^{1}, महो मस्याथनम् D^{2}, हनुत्वा त्रयतं F^{1}, हिक्कासूत्रयतं F^{2}, ++ओस्यायतं G.

५. 38a हनुश्च षड्यवा ज्ञेया] A, B^{1-3}, C, D^{2}, G, हन्योत्यं षड्विधा ज्ञेयां F^{1}, हनोर्ध्वं षड्यवा ज्ञेयां F^{2}.

६. 38c अधरोष्टस्य विस्तारम्] A^{2}, B^{1-3}, D, F, G, अधरोष्ठं सविस्तारं A^{1} ; 38d अङ्गुलं स्याद्यवाधिकम्] D^{2}, F, अङ्गुल्याद्वा यवाधिकम् A^{1}, अङ्गुल्यष्टयवाधिक्यम् A^{2}, अङ्गुल्यद्बियवाधिकम् B^{1-3}, अङ्गुल्यस्य च यवाधिकम् D^{1}, अङ्गुलद्बियवाधिक्यम् G.

७. 39a तिर्यक् च कोलका ज्ञेया] Eds., त्र्यर्गता कोलका ज्ञेया A, B^{1-2}, G, त्र्यग्गता कोलका ज्ञेया B^{3}, त्यागनकोलया ज्ञेया C^{1}, त्वगगना कोलया ज्ञेया D, तस्यार्धं रक्ततारं स्यात् F ; 39b रक्तभागमिति स्मृतम्] A(etc.), त्र्यर्गता कोलका भवेत् F.

८. F^{1} est lacunaire de 39d à 41c. D^{1} omet 39cd.

९. 39c अधरोष्ठस्य] A(etc.), उत्तरोष्ठस्य F ; 39d मध्यमं यावकं विदुः] A^{1}, °मध्यार्धं यवाकं विदुः A^{2}, B^{1-3}, G, मध्यमार्धं यवं विदुः C, °मध्यर्धं यवं विदुः D^{2}, °मध्यर्धं वा यवाधिकम् F^{2}.

१०. F^{2} omet 40ab.

११. 40a हि रक्तधारं] A, B^{1-3}, G, च रक्ततारम् C, रक्ततारं D.

१२. 40c तिर्यक्त्र्यङ्गुलार्धं च] (*v.f.*) A, B^{1-3}, C^{2}, G, lacune C^{1}, आस्या त्र्यङ्गुलार्धं च D^{1},

त्रियवमुत्तरोष्ठं च त्रियवं कोलकं भवेत्[१] ।
चतुर्यवं गोजिकायास्तस्यार्धं विस्तृतं भवेत्[२] ॥ ४१ ॥
पञ्चदशयवोत्सेधं नासिकायाममिष्यते[३] ।
पुटद्वयोः पुष्करान्ते पञ्चदशयवं विदुः[४] ॥ ४२ ॥
पुष्करं षड्यवोत्सेधं विस्तारं यवमुच्यते।
यवसप्तपुटं तारं चतुर्यवपुटोन्नतम्[५] ॥ ४३ ॥
यवद्वयं चाग्रनासी तिलपुष्पसमाकृतिः[६] ।
नेत्रं द्वयाङ्गुलायामं द्वियवाधिकमिष्यते[७] ॥ ४४ ॥
[८]षड्यवं नेत्रविस्तारं करवीरो यवो भवेत्[९] ।
मध्ये पञ्चयवं तारं ज्योतिर्यवप्रमाणतः[१०] ॥ ४५ ॥

त्र्यस्यात्त्र्यङ्गुलार्धं च D^2, सार्ध त्र्यङ्गुलर्धं च F^2 ; 40d आस्यतारमिति स्मृतम्] A, B^2, C, D, G, कुत्स्य तारमिति स्मृतम् B^1, कुस्य तारमिति स्मृतम् B^3, आस्यताटं विध्यते F^2.

१. 41a च] A(etc.), स्यात् F^2 ; 41b त्रियवं कोलकं] B^{1-3}, त्रियवं कोलको A, G, त्रियवकावाकवोद् C, D^2, त्रियवकापाकवो D^1, त्रयकापालिका F^2.

२. 41c गोजिकायास्] SNB., कोलिकायास्तु (*v.f.*) A, B^1, कोर्परायास्तु B^2, कोविशयस्तु B^3, lacune C^1, गोदिकास्तु C^2, कोटिकास्तु D, गोर्मिकायान्तं F^2, चतुर्यवं विकायास्तु G ; 41d तस्यार्धं विस्तृतं] A, B^{2-3}, D, F^2, G, तस्यार्धं विस्मृतं B^1, C^2, lacune C^1, मध्यमं विस्तृतं F^1.

३. 42a पञ्चदशयवोत्सेधं] A(etc.), उत्सेधं नासिकायास्तु F ; 42b नासिकायाममिष्यते] A, B^{1-3}, C, D, नासिकायामं इहोच्यते G, कोलका यवहीनकम् F^1, कोलकं यवहीनकम् F^2.

४. 42c पुटद्वयोः पुष्करान्ते] A, B^{1-3}, C^2, G, lacune C^1, पुटद्वयो पुष्करन्तेति D, पुटद्वयो म पुष्करन्ति F^1, पुटद्वयो म पृष्ठरन्त्रि F^2 ; 42d पञ्चदशयवं विदुः] B^{1-3}, C, D, त्रिपञ्चादशयवं विदुः A, G, केङ्कालयवहीनकम् F^1.

५. 43c यवसप्तपुटं तारं] A,(etc.), पुटतारं सप्तयवं F ; 43d चतुर्यवपुटोन्नतम्] A, B^{1-3}, G, चतुर्यवं पुटमुत्तमम् C, D, उन्नतं स्याच्चतुर्यवम् F,.

६. 44a यवद्वयं चाग्रनासी] A^1, B^{1-3}, C^2, D, F^1, G, यवद्वयण्चोग्रनासि च A^2, यद्वयं चाग्रनासि C^1, चतुर्यवं चाग्रनाडीति F^2.

७. 44c द्वयाङ्गुलायामं] A, B^{1-3}, C^2, D, G, lacune C^1, स्याद्घ्यङ्गुलयाम॰ F ; 44d द्वियवाधिकमिष्यते] A, B^{1-3}, G, तद्यवाधिकमिष्यते C, D, यवाधिक्यां च मेव च F.

८. 17.45ab = 16.63ab.

९. 45b यवो] A etc.), यवा F.

१०. 45d ज्योतिर्यवप्रमाणतः] B^{1-3}, C, D, G, चतुर्यव प्रमाणकम् A, ज्योतिस्यैव प्राधिकम् F.

[१]दृष्टिर्यूकप्रमाणेन त्रिविधाकारमण्डलम्[२] ।
शेषं वै शुक्लभागं च त्रिवर्णं लोचनं भवेत्[३] ॥ ४६ ॥
भ्रूरेखा चक्षूरेखा च द्व्यङ्गुलं त्रियवाधिकम्[४] ।
[५]भ्रूरेखादूर्ध्वकेशान्तं कला पञ्चयवाधिकम्[६] ॥ ४७ ॥
भ्रूदीर्घं पञ्चमात्रं स्याद्विस्तारं यवमुच्यते[७] ।
आपूर्णकार्मुकाकारौ भ्रुवौ लक्षणसंयुतौ[८] ॥ ४८ ॥
मूलं नासिभ्रुवोत्सेधमङ्गुलं तस्य संगमम्[९] ।
अक्षिद्वयान्तरं तिर्यग्यवहीनद्वियङ्गुलम्[१०] ॥ ४९ ॥
कर्णयोरन्तरं पूर्वं विंशत्यङ्गुलमेव च[११] ।
अपाङ्गात्कर्णमूलान्तं यवहीनमृषिमात्रकम्[१२] ॥ ५० ॥

---

१. F^1 et F^2 omettent 46a à 47b.

२. 46a दृष्टिर्यूकप्रमाणेन] D^1, दृष्टिर्युगप्रमाणेन A, B^1, C, G, दृष्टिऋयवप्रमाणेन B^{2-3}, दृष्टि यूकप्रमाणो D^2.

३. 46c वै शुक्लभागं] B^2, D, G, वै शुक्यभावं A^1, वै शुक्लभावं A^2, B^1,2, +++भागं C ; 46d लोचनं भवेत्] A, B^{1-3}, G, लोचनसन्निभम् C, D.

४. 47a भ्रूरेखा] A, B^{1-3}, C, G, lacune D^1, भ्रूरग्रे D^2.

५. D^1 omet 47cd.

६. 47c °केशान्तं] A(etc.), °रेखा च F ; 47d कला पञ्च°] A, B^1, C, D^2, G, कपालञ्च° B^{2-3}, कलौ पञ्च° F.

७. 48a भ्रूदीर्घं] A, B^{1-2}, D^2, G, भ्रूदीपं B^3, भ्रूरेखा C, F, मृदीर्घं D^1.

८. 48c आपूर्णकार्मुकाकारौ] A, B^{2-3}, G, आपूर्णकाममाकारो B^1, आचूर्णका मुखाकारे C^2, आचूर्णका मुखाकारो C^1, +++कामुकाकारो D^1, आचूर्णका मुखाकारो D^2, आपूर्णं कार्मकाकारं F^1, अपूर्णं कार्मुखाकारं F^2 ; 48d भ्रुवौ लक्षणसंयुतौ] D^2, भ्रुवौ लक्षण संयुतम् A, G, भ्रुवोर्लक्षण संयुतम् B^{1-2}, F^1, भ्रूवो लक्ष संयुतम् B^3, भ्रुवो लक्षण संयुतम् C, F^2, द्रवौ लक्षण सम्युतौ D^1.

९. 49a मूलं नासिभ्रुवोत्सेधम्] A, D^2, मूलनासीभ्रुवोत्सेधम्, B^{1-3}, C, G, द्रवनाली द्रवोत्सेधं D^1, मूलं तत्स्यात्प्रवोत्सेधं F.

१०. 49c अक्षिद्वयान्तरं तिर्यग्] A, B^{1-3}, C^2, G, अक्षिद्वियन्तरं त्र्यक् C^1, D^2, अक्षिद्वियन्तरं तत् D^1, अक्षद्वयान्तं त्र्य F^1, अक्षत्रयान्तद्वयं (?) F^2 ; 49d यवहीनद्वियङ्गुलम्] SNB., यवहीनं द्वयङ्गुलम् A, B^{1-3}, C^2, D^2, F^2, G, यवहीन स द्वियाङ्गुलम् (*v.f.*) C^1, D^1, lacune F^1.

११. 50a अन्तरं पूर्वं] B^{1-3}, G, अन्तरो A, अन्तरं C^2, अङ्गुलं चैव F^1, अन्तरश्चैव F^2 ; 50b विंशत्यङ्गुलमेव च] F^1, सुविंशत्यङ्गुलं भवेत् A, B^{1-3}, C^2, G, विंशत्यङ्गुलमेव वा F^2.

१२. 50c कर्णमूलान्तं] A^2, B^{1-3}, कर्णमूलान्त A^1, F, कण्ठमूलान्तं C^2, कर्णमूलस्तं G ; 50d यवहीनमृषिमात्रकम्] (*v.f.*) A, B^{1-3}, C^2, G, दृष्तिमात्रं यवक्षयं F^1, अष्टमात्रा यवक्षयम् F^2.

द्विमात्रं कर्णविस्तारं द्विगुणादायतं विदुः[१] ।
अधस्तात्कोलकं ज्ञेयं तन्नालायाममिष्यते[२] ॥ ५१ ॥
मात्रार्धं पूर्वनालं स्यात्परनालाङ्गुलं विदुः[३] ।
भ्रूरेखा च यवाधिक्यं कर्णोच्छ्रयं विशेषतः[४] ॥ ५२ ॥

[२.६. उष्णीषादिमानम्]

उष्णीषात्पुरपृष्ठान्तं केशान्तं त्रिंशदङ्गुलम्[५] ।
उष्णीषात्पार्श्वकेशान्तमेकैकं तु नवाङ्गुलम्[६] ॥ ५३ ॥
ललाटं पञ्चाङ्गुलं तारं केशान्तस्याकृतिर्भवेत्[७] ।
पृष्ठस्य कर्णयोर्मध्ये षड्कोलकमिति स्मृतम्[८] ॥ ५४ ॥

[३. देववशाद्देवीप्रतिमा]

देवदेहप्रमाणं तु त्रिविधं मानमिष्यते[९] ।

---

१. 51a कर्ण°] A^1(etc.), कण्ठ° A^2 ; 51b द्विगुणादायतं विदुः] A, $B^{1\text{-}3}$, C^2, G, विस्तारं द्विगुणायतम् F.

२. 51c अधस्तात्कोलकं ज्ञेयं] B^3, G, अधस्तात्कोलका मज्ञं A, अधस्तात्कोलका ज्ञेया $B^{1\text{-}2}$, C^2, नालयामं तदर्धस् F^1, नालयामन्नदर्धस्ता च F^2 ; 51d तन्नालायाममिष्यते] A, $B^{1\text{-}3}$, G, नालायामितिष्यते C^2, तत्कला स्याद्यवाधिकम् F^1, कला स्याद्यवमधिकम् F^2.

३. 52a मात्रार्धं पूर्वनालं] A, $B^{2\text{-}3}$, C, D, G, मन्त्रार्थं पूर्वनालं B^1, ++मात्रार्धं पूर्व F^1, मात्रार्धमपूर्वं F^2 ; 52b परनालाङ्गुलं] A, D^1, परं नालाङ्गुलं $B^{1\text{-}2}$, C, D^2, G, परं नालाबिलं B^3, अपरं चाङ्गुलं F.

४. 52c भ्रूरेखा] A(etc.), मृणालरेखा D^1 ; 52d कर्णोच्छ्रयं विशेषतः] A, C, D^2, कर्णोत्सेधं विशेषतः $B^{1\text{-}3}$, कण्ठोच्छ्रेयं विशेषतः D^1, G, कर्णशास्यद्विशेषतः F^1, कर्णा चा स्याद्विशेषतः F^2.

५. 53a पुर°] A(etc.), पर° F ; 53b केशान्तं त्रिंशदङ्गुलम्] B^1, D^2, G, केशांशं त्रिंशदङ्गुलम् A^1, $B^{2\text{-}3}$, केशांशाङ्गुलं त्रिंशदङ्गुलं A^2, केशान्तं त्रिरदङ्गुलं C, केशान्तं त्रिंदशङ्गुलम् D^1, केशान्तं त्र्यंशदङ्गुलम् F.

६. 53c पार्श्वकेशान्तम्] A^2, $B^{1\text{-}3}$, C^2, D, F^2, G, पार्श्वकेशान्त A^1, lacune C^1, पाराकेशान्तम् F^1 ; 53d नवाङ्गुलम्] A, $B^{1\text{-}3}$, C, D, F, द्वयाङ्गुलम् G.

७. 54a ललाटं पञ्चाङ्गुलं तारं] (*v.f.*) A, $B^{1\text{-}2}$, D^1, G, ललाटपञ्चाङ्गुलं तारं C^2, B^3, ललाटं पञ्चाङ्गुलं तार D^1, ललाटे पञ्चान्तरं F^1, ललाटे पञ्चाङ्गुलं तारं F^2 ; 54b केशान्तस्याकृतिर्भवेत्] A^2, $B^{1\text{-}3}$, C, D^1, G, केशं तस्याकृतिर्भवेत् A^1, D^2, केशान्तं स्याद्विशेषतः F.

८. 54c पृष्ठस्य कर्णयोर्] A, $B^{1\text{-}3}$, पृष्ठस्य कान्तयोर् C, पृष्ठस्य कन्नयोर् D, तत्पृष्ठकर्णयोर् F, पृष्थस्य कण्ठयोर् G.

९. 55a देवदेहप्रमाणं] C, देहे देहे प्रमाणं तु A^1, $B^{1\text{-}3}$, G, देहेहे प्रमाणं तु A^2, D^2, ++देहे प्रमाणं तु D^1, देहे देहे तु यन्मानं F^1, देहे देहे यन्मानं F^2 ; 55b त्रिविधं मानमिष्यते] Eds., त्रिगुणं नाहमिष्यते A, $B^{1\text{-}3}$, D, G, त्रिगुणा नाहमिष्यतेC, त्रिगुणं नाहमुच्यते F.

प्रतिमोत्सेधमानेन देवीमानं प्रचक्षते[१] ॥ ५५ ॥
नास्यन्तं चापि चास्यान्तम् हनुबाह्वन्तमेव च[२] ।
नास्यन्तमुत्तमं ज्ञेयमास्यान्तं मध्यमं भवेत्[३] ॥ ५६ ॥
[४]बाह्वन्तमधमं ज्ञेयं देव्यास्तुङ्गमिहोच्यते[५] ।
[६]पूर्वोक्तलक्षणोपेतमुमाद्याः कारयेद्बुधः[७] ॥ ५७ ॥
स्थानके स्थानकं देवी आसीने चासनं भवेत्[८] ।
[९]सुखासनस्य देवस्य देवी चासनमेव हि[१०] ॥ ५८ ॥
अन्यथा च न कर्तव्यं कर्ता भर्ता च नश्यते[११] ।
शैलजे शैलजा देवी दारुजे दारुजा तथा[१२] ॥ ५९ ॥
मृण्मये मृण्मयं प्रोक्तं लोहजे लोहजं भवेत्[१३] ।

---

१. 55d देवीमानं प्रचक्षते] C, D, G, देवमानं प्रचक्षते A, B^{1-3}, देवीमानं वदाम्यहम् F.

२. 56a चापि चास्यान्तम्] B^{1-2}, G, चापि चास्यन्तम् A^1, चापि चास्यन्तम् A^2, वापि चास्यन्तम् B^3, F^1, वापि वासान्तम् C, वापि वास्यान्तम् D, वापि नास्त्यन्तं F^2 ; 56b हनुबाह्वन्तम्] B^{1-3}, अनुबाह्वन्तम् A, D^1, G, अनुपावन्तं C^1, मनुपापं तम् C^2, अनुबांवन्तम् D^2, हनुबाह्वन्तर् F^1, अनुबाह्यन्तम् F^2.

३. 56d मध्यमं भवेत्] A, B^{1-3}, C, D, G, हनु मध्यमम् F^1, हञ्च मध्यमम् F^2.

४. B^3 omet 57ab-60ab.

५. 57a बाह्वन्तम्] A, B^{1-2}, D^2, F, G, बाह्यन्तं C, D^1 ; 57b देव्यास्तुङ्गमिहोच्यते] B^{1-2}, G, देव्यास्तु मिहोच्यते(?) A^1, दैर्घ्यस्तुङ्गमिहोच्यते A^2, lacune C, देव्यस्त्वङ्गमुच्यते D^1, देव्यास्तुङ्गमुच्यते D^2, सर्वेषामिति कीर्तितम् F.

६. F^1 intercale après 57ab le demi-vers : पूर्वोक्तं लक्षणं ज्ञेयं सर्वेषामिति कीर्तितम्।

७. 57c °लक्षणोपेतम्] A, B^1, D, G, °लक्षणं प्रोक्तं B^2, °लक्षणैर्युक्तम् F ; 57d उमाद्याः कारयेद्बुधः] C, D, उताद्रा (?) कारयेद्बुधः A^1, उमाद्या कारयेद्बुधः A^2, उदाद्यु (?) कारयेद्बुधः B^1, उदद्या (?) कारयेद्बुधः B^2, G, उमा दीप्यैश्च कारयेत् F^1, उमा दीपैश्च कारयेत् F^2.

८. 58a स्थानकं देवी] A^1, B^2, स्थानके देवीA^2, B^1, स्थानदेवी च C, D, स्थानके वापि F^1, स्थानके देवी च F^2, स्थानकं देवं G ; 58b चासनं] B^2, C, D, F, G, चासिनं A, चासकम् B^1.

९. F^2 omet 58cd ; B^2 omet 58cd-60ab.

१०. 58c सुखासनस्य] A, B^1, C^1, D^1, F^1, G, सुखासन° (*v.f.*) C^2, सुखानस्य (*v.f.*) D^2.

११. 59a च] C, D, F, G, चेन् A, B^1 ; 59b भर्ता च नश्यते] A^1, भर्ता च नश्यति A^2, G, भक्ता च नश्यति B^1, भर्ता विनश्यति C, D, F^1, भक्ता विनस्याति F^2.

१२. 59c शैलजे शैलजा देवी] A^2, B^1, G, शैलजैः शैलजा देवी A^1, C, D, शैलजां देवीं शैलजां F^1, शैलजां शैलजा देवी F^2 ; 59d दारुजे दारुजा तथा] G, दारू वै दारुजं तथा A^1, दारुजे दारुजं तथा A^2, B^1, दारुजैर्दारुजैस्तथा C, दारुजैर्दारुवै तथा D, देवीम्दारु पेदारयेत्(?) तथा F^1, दाकवो दारवे ततः F^2.

१३. 60a मृण्मये मृण्मयं प्रोक्तं] A, B^1, G, मृन्मयं मृन्मयं प्रोक्तं C^1, D, मृन्मयं मृन्मयैः प्रोक्तं

[१]अन्यथा च न कर्तव्यं राजराष्ट्रं विनश्यति॥ ६० ॥
एवं यः कुरुते ज्ञात्वा पृथिव्यामेकराड्भवेत्[२] ।
[३]एवं युक्तिविशेषेण योजयेत्तु विचक्षणः[४] ॥ ६१ ॥
॥ इति दीप्तशास्त्रे प्रतिष्ठातन्त्रे देव्या लक्षणपटलः सप्तदशः[५] ॥

C^2, मृन्मयो नयतश्चेत्त F^1, मृन्मयो मृन्मयश्चोक्त F^2 ; 60b लोहजे] A^2, B^1, F^2, G, लोहजैर् A^1, C^2, D, लोहजं C^1, लोहके F^1.

१. F^2 omet 60cd.

२. 61a एवं यः कुरुते ज्ञात्वा] A, B^{1-3}, G, एवं च कुरुते ज्ञात्वा C, D^1, एकरुते ज्ञात्वा D^2, एवं यः कुरुते मर्त्यः F^1, एवं यः कुरुते भूत्वा F^2 ; 61b पृथिव्यामेकराड्] A, B^{1-3}, D, F^1, G, प्रच्यते मकराड् C^1, प्रथ्यते चैकराड् C^2, पूर्वो मे करां F^2.

३. C et F omettent 61ab que les manuscrits F remplacent par : पुत्रपौत्रविवर्धन्ते धनधान्यविवर्धनम्।

४. 61d विचक्षणः] A, B^{1-3}, G, विशेषतः C^2, D ; F^1 et F^2 ajoutent avant le colophon : स्त्रीणां मानमिदं प्रोक्तं वास्तुहोमं ततः सृणु।

५. A^2 : इति दीप्तशास्त्रे प्रतिष्ठातन्त्रे देव्यालक्षणपटलेऽष्टादशाम् ; B^{1-2}, G : इति दीप्तशास्त्रे प्रतिष्ठातन्त्रे देवीलक्षणपटलः ; B^3 : इति श्रीदीप्तशास्त्रे प्रतिष्ठातन्त्रे देव्यलक्षणपटलः ; C^1 : इति दीप्तशास्त्रे प्रतिष्ठातन्त्रे देव्या लक्षणविधिः सप्तदशपटलः ; C^2 : इति श्रीदीप्तषास्त्रे प्रतिष्ठातन्त्रे देव्या लक्षणविधिः सप्तदशपटलः ; D^1 : इति दीप्तशास्त्रे प्रतिष्ठातन्त्रे देव्या लक्षणः पटलः अष्टादशः ; D^2 : इति दीप्तशास्त्रे प्रतिष्ठातन्त्रे देव्या लक्षण पटल अष्टादशमः ; F : इति दीप्तशास्त्रे प्रतिष्ठातन्त्रे स्त्रीमानलक्षणः सप्तविंशतिः पटलः।

[अष्टादशपटलः]
[ब्रह्मसूत्रलक्षणम्][१]

[२]अतः परं प्रवक्ष्यामि ब्रह्मसूत्रस्य लक्षणम्।
लिङ्गं च निर्व्रणं कृत्वा पूजाभागे तु विन्यसेत्[३] ॥ १ ॥
पूजाभागसमस्तं तु षोडशांशैर्विभाजयेत्।
वेदभागोपरि त्यज्यमश्विन्यौ वर्जयेदधः[४] ॥ २ ॥
दशमे लक्षणोद्धारं हेमसूच्या पुनर्लिखेत्।
नवांशं मध्यमं सूत्रं पक्षसूत्रे तु लम्बयेत्[५] ॥ ३ ॥
मध्यमेन तु यत्सूत्रं तत्सूत्रं समलम्बयेत्[६]।
एकांशे मुकुलं कुर्याद्यवाकाराग्रसंयुतं[७] ॥ ४ ॥
यवविस्तारनिम्नं तु त्रिसूत्रं चैव लक्षणम्।
एकैकान्तरमानं तु त्रियवं वा चतुर्यवम्[८] ॥ ५ ॥
मुकुले मूलविस्तारमङ्गुलं द्वियवाधिकम्।
तस्याग्रादेकहीनं तु मुकुलस्य तु लक्षणम्[९] ॥ ६ ॥
कद्रुद्रायेति मन्त्रेण मध्यसूत्रं तु लेखयेत्[१०]।
[११]ब्रह्मजज्ञानमन्त्रेण लिखेद्दक्षिणसूत्रकम्॥ ७ ॥
इदं विष्णिवति मन्त्रेण वामसूत्रं तु लेखयेत्[१२]।

---

१. Manuscrits utilisés : A^1, A^2, B^1, B^2, B^3, C^1, C^2, D^1, D^2, G.

२. C^1 omet les vers 1 et 2.

३. 1c निर्व्रणं] A^2, B^{1-3}, D^2, G, निर्घृणं A^1, निर्वृणं C^2, D^1.

४. 2d अश्विन्यौ वर्जयेदधः] Eds., अश्विन्याद्वाथ वर्जयेत् A^1, अश्विन्या चाथ वर्जयेत् A^2, B^{1-3}, C^2, G, अश्विन्यो चाथ वर्जयेत् D^1, अश्विन्यो वाथ वर्जयेत् D^2.

५. 3d पक्षसूत्रे] A^2, C, D^2, वक्ष्यसूत्रे A^1, लक्षसूत्रे B^{1-3}, पक्षसूत्रं D^1, वक्षसूत्रे G.

६. 4b समलम्बयेत्] A, B^{1-3}, C^1, D^1, G, समलेखयेत् C^2, समलयेत् (?) D^2.

७. 4d यवाकाराग्र°] A^2, C, D, यवाकाराग्रज° (*v.f.*) A^1, द्यवाकाराग्र° B^1, च्यवाकाराग्र° B^{2-3}, यवाकाराश्र° G.

८. 5c एकैकान्तर°] Eds., एकैकं तार° A^1(etc.) (cf. 20.88cd).

९. 6c तस्याग्रादेकहीनं] A, B^{1-3}, C^1, D, G, तस्याग्राद्चैकहीनं C^2.

१०. 7a कद्रुद्रायेति] A, B^3, C, D, G, कमृदायेति B^2.

११. A et B^1 omettent 7cd-8ab.

१२. 8b वाम°] B^{2-3}, C, D, सोम° G.

स्निग्धगम्भीरमधुना न स्थूलं न कृशं तथा[१] ॥ ८ ॥
न वक्रन्नापि विच्छिन्नं न बिन्दुकलशान्वितम्[२] ।
एते शुभास्तु रेखाया ब्रह्मसूत्रस्य लक्षणम्[३] ॥ ९ ॥
गवाक्षं महिषाक्षं च खट्वाङ्गं करपुटाकृतिः[४] ।
गवाक्षं ब्राह्मणस्योक्तं खट्वाङ्गं क्षत्रियस्य तु॥ १० ॥
महिषाक्षं तु वैश्यानां शूद्रे करपुटाकृतिः[५] ।
सर्वेषां करपुटाकारं समुदायविधानकम्[६] ॥ ११ ॥
॥ इति दीप्तशास्त्रे प्रतिष्ठातन्त्रे ब्रह्मसूत्रपटलोऽष्टादशः[७] ॥

१. 8c °मधुना] B^{1-3}, C, D, G, °मधुरं A ; 8d न स्थूलं न कृशं] A^2, G, नानस्तूलानकृशं A^1, न त्रिलग्नकृशं B^{1-2}, नस्त्रलग्रकृशं B^3, न स्थूलं निकृतं C^1, न स्थुलं निकृतिं C^2, lacune D^1, न स्थूलाग्रे कृतं D^2.

२. 9a न वक्रन्नापि विच्छिन्नं] A, B^3, रवकानापि विच्छिन्नं B^1, नवकं नापि विच्छिन्नं B^2, न वक्रान्तामवच्छिन्ना C, D^2 (?), न वक्रं नामविच्छिन्ना D^1, न खण्डं नापि विच्छिन्नं G ; 9b न बिन्दु°] A, B^{2-3}, C, D, तद्बिन्दु° B^1.

३. 9c रेखाया] A, B^{2-3}, रेखायाः B^1, रेखायां C, D, G.

४. 10b खट्वाङ्गं करपुटाकृतिः] (*v.f.*) B^{2-3}, खट्वाङ्गं कर्पटाकृतिः A, G, सद्वाङ्गं करपुटाकृतिः B^1, खड्वाग्रं करपुटाग्रकम् C, D.

५. 11a महिषाक्षं तु] G, महिषास्य तु A, महिषाक्षं च D, महिषाक्षस्य G(var.) ; 11b करपूटाकृतिः] A, B^{1-3}, G, करपूटाग्रकः C, D.

६. 11c करपुटाकारं] (*v.f.*) A^1(etc.) ; 11d विधानकम्] A, B^{1-3}, D, G, विधानतः C.

७. A^2 : इति दीप्तशास्त्रे प्रतिष्ठातन्त्रे ब्रह्मसूत्रपटलः एकोनविंशतिः ; B^1 : इति दीप्तशास्त्रे प्रतिष्ठातन्त्रे ब्रह्मसूत्रपटलः ; B^{2-3} : इति दीप्तशास्त्रे प्रतिष्ठातन्त्रे ब्रह्मसूत्रलक्षणः पटलः ; C : इति दीप्तशास्त्रे प्रतिष्ठातन्त्रे ब्रह्मसूत्रलक्षणविधिः अष्टादश पटलः ; D : pas de colophon ; G : इति दीप्तशास्त्रे प्रतिष्ठातन्त्रे ब्रह्मसूत्रलक्षणं नामैकोनविंशः पटलः ।

[एकोनविंशतिः पटलः]
[वास्तुहोमविधिः][१]

अथातः संप्रवक्ष्यामि वास्तुहोमविधिक्रमम्।

[१. वास्तुहोमसमयः]

वास्तु संपूजयेत्पूर्वमेकाशीतिपदेषु च[२] ॥ १ ॥
आद्यशैलेष्टकाधाने लिङ्गस्थापनकर्मणि[३] ।
सकलस्थापने चैव प्रोक्षणे बालमन्दिरे॥ २ ॥
मण्डपे नृत्तरङ्गे च सभासत्राग्निमण्डपे[४] ।
वास्तुहोमः प्रकर्तव्यः सर्वशम्बरसंयुतः[५] ॥ ३ ॥

[२. आचार्यलक्षणम्]

दीक्षितश्चाग्निहोत्री च सर्वेन्द्रियविनिग्रहः।
[६]तन्त्रज्ञो विधिमान्वास्तुशास्त्रज्ञः सपरिग्रहः[७] ॥ ४ ॥
नाङ्गहीनो विशुद्धात्मा वास्तुहोममथाचरेत्[८] ।

[३. स्थण्डिलं मण्डलं च]

समरीयपदे सम्यक्स्थण्डिलं विधिना कुरु[९] ॥ ५ ॥
हस्तमात्रं तु विस्तारमुत्सेधं स्यात्त्रयाङ्गुलम्[१०] ।
जलावर्तं न्यसेदैन्द्रे शालिमध्ये विशेषतः[११] ॥ ६ ॥
गन्धतोयेन संपूर्य हेमं तत्रैव निक्षिपेत्[१२] ।

---

१. Manuscrits utilisés : A^1, A^2, C^1, C^2, D^1, D^2, F^1 G.

२. 1c वास्तु] A, वास्तुं C, D, F^1, G.

३. 2a °काधाने] C, D^2, °धानेन A^1, °याने च A^2, G, °कादाने D^1, °कधारे F^1.

४. 3b °सत्राग्निमण्डपे] A^2, D^2, G, °स्त्राग्निश्च मण्डपे A^1, °सत्राग्निमण्डले C, D^1, F^1.

५. 3d °शम्बरसंयुतः] Eds., °संभारसंयुतम् A^1, G, °संहारसंयुतम् A^2, °संभवसंयुतः C^1, °संभवसंयुतम् C^2, D, °संस्कारसंयुतम् F^1.

६. C^1 omet 4cd.

७. 4c विधिमान्वास्तु°] A^2, G, विधिमन्यास्तु A^1, D^2, विधिमन्यस्य C^2, विधिमश्चास्तु D^1, वास्तुविद्धीमान् F^1.

८. 5a नाङ्गहीनो वि°] F^1, रङ्गहीनवि° A^1, रागहीन वि° A^2, नाङ्गनाही वि° C^1, नाङ्गना हि वि° C^2, नाङ्गहीनापि D, रागहीनो वि° G.

९. 5c समरीयपदे] C, D, F^1, समारिकपदे A, G.

१०. 6a °मात्रं तु विस्तारम्] A, °मात्रप्रविस्तारम् C, D, F^1, lacune G.

११. 6c जलावर्तं] Eds. (cf. *Kāraṇa* I.56.7), रजावर्तं A^1, राजावर्तं A^2, D^1, G, लाजावर्तं C, D^2, मूलवर्तं F^1 ; 6d शालिमध्ये] C, D, F^1, शैलमध्ये A^1, G, शैलिमध्ये A^2.

१२. 7a संपूर्य] A(etc.), संपूज्य F^1 ; 7b हेमं] A^2, होमं A^1, F^1, हैमं C, D, G.

[१]दूर्वापालाशशाखांश्च तन्मध्ये तु विनिक्षिपेत्[२] ॥ ७ ॥
गन्धपुष्पादिना पूज्य द्वारस्थाने पदे क्रमात्[३] ।
उल्लेखनं प्रकर्तव्यं शास्त्रदृष्टेन कर्मणा[४] ॥ ८ ॥
पूर्वाग्रतिसृरेखाभिरुत्तराग्राभिरेव च[५] ।
[६]रुद्रं विवस्वतं सोमं वरुणाग्नीन्द्रमेव च॥ ९ ॥
अघोरेण समालिख्य प्रोक्षयेत्पुरुषेण तु[७] ।
मथित्वाऽग्निं विनिक्षिप्य हृदयेन तु मन्त्रतः॥ १० ॥
वास्तोष्पतेति मन्त्रेण ह्युपस्थानं समाचरेत्[८] ।
[९]प्रागग्रैरुदगग्रैश्च दर्भैश्चैव परिस्तरेत्॥ ११ ॥
अग्नेश्चैवाथ दिग्दर्भान्संपरिस्तीर्य देशिकः[१०] ।

[४. पात्रादिविधिः]

तत्रैव सादयेत्पात्रानधोवक्त्रान्द्वयं द्वयम्[११] ॥ १२ ॥
आज्यस्थालीं स्रुवं चैव प्रणीतां प्रोक्षणीं तथा।
[१२]समित्कूर्चचरुं दर्वीमुपस्पृश्य कमण्डलुम्[१३] ॥ १३ ॥

---

१. C^2 omet 7cd.

२. 7c दूर्वा°] A, C^2, D^2, मृद्ध (?) D^1, पूर्व F^1, G.

३. 8a °पुष्पादिना] A, C^2, D, G, °पुष्पादिभिः C^1 ; 8b °स्थाने पदे] A^1, °स्थाने पद° C, D, °स्थान्देवतान् F^1, °स्थानपदे G.

४. 8d lacune C^1.

५. 9a °ग्रतिसृरेखाभिर्] A, C^1, G, °ग्राभिस्त्रिरेखाभिर् C^2, °ग्रास्तिसृरेखाभिर् D^1, °ग्रस्तिस्रेखाभिर् D^2, °ग्रभिरेखा च (*v.f.*) F^1 ; 9b °त्तराग्राभिरेवच] C^2, °त्तराग्रास्तथैव च A(etc.).

६. C^1 et C^2 donnent la version suivante de 9cd : रुद्रो विवस्वतः सोमो वरुणाग्नीन्द्र एव च। ; F^1 : रुद्रो वैवस्वतः सोम इन्दो वरुण एव च।

७. 10a अघोरेण समालिख्य] A, G अघोरास्त्रेण संलिख्य C, D, F^1 ; 10b प्रोक्षयेत्पुरुषेण तु] C, D, F^1 पुरुषेण तु प्रोक्षयेत् A, G.

८. 11b ह्युपस्थानं] C^2 उपस्थानं A, F^1, G, अभ्युपस्थानं C^1, D^2.

९. C^1 lacune 11d-12c ; D^1 omet 11cd ; F^1 donne la version suivante de 11cd : दर्भैस्तु संपरिस्तीर्य बुद्धिमान्प्रागुदगग्रतः।

१०. 12a दिग्दर्भान्] A^1, D^1, G, दिग्भागे C^2, D^2, F^1, दिग्दर्भा A^2.

११. 12c सादयेत्पात्रान्] A^1, G, साधयेत्पात्रान् A^2, D, साधयेत्++न् C^2, सादयेत्पात्रं F^1.

१२. F^1 donne la version suivante de 13cd : चरु ++चरु देर्वीं वदय सृक्कमण्डलुम्।

१३. 13c कूर्चचरुं दर्वीम्] A, कूर्चौ चरुं दुर्वा C^1, कूर्चौ चरू दूर्वाम् C^2, कूर्चौ चरु ++ D^1, कूर्चौ चारुं दर्विं D^2, G.

एतानि द्वन्द्वरूपेण सादयेत्तु विशेषतः[१] ।
प्रोक्षणीपात्रमादाय जलेनैव प्रपूरयेत्॥ १४ ॥

[२] [Lacune]

वितस्तिमात्रमायामं मध्यमे ग्रन्थिसंयुतम्।
अङ्गुष्ठानामिकाग्राभ्यामुदकोत्प्लवनं कुरु[३] ॥ १५ ॥
पात्राणि प्रोक्षयेत्तेन चोत्पूर्य स्वस्तिमन्त्रतः[४] ।
उद्धृत्य सर्वपात्राणि समिद्वन्ध्यं विसर्जयेत्[५] ॥ १६ ॥
ब्रह्माणं दक्षिणे स्थाप्य पूजयित्वा यथाक्रमम्।
प्रणीतापात्रमादाय जलेनापूर्य मन्त्रतः ॥ १७ ॥
ऊर्ध्वतो दर्भसंयुक्तं प्रणीतां उत्तरे न्यसेत्[६] ।
[७]लोकपालान्यथास्थाने पूजयित्वा स्वनामतः ॥ १८ ॥
आज्याधिश्रयणं कृत्वा पश्चिमे चोत्तरेऽपि वा[८] ।
व्यपोह्याङ्गारकान्विद्वांस्तत्रैवाज्यं विनिक्षिपेत्[९] ॥ १९ ॥
[१०]द्वौ दर्भाग्रावभिद्योत्य द्वौ दर्भाग्रौ विनिक्षिपेत्[११] ।
घृतमादाय हृदिना अभिद्योतनमारभेत्[१२] ॥ २० ॥

---

१. 14a °रूपेण] A, G, °रूपाणि C, D, F^1 ; 14b सादयेत्] A, D^2, F^1, G, साधयेत् C, D^1.

२. Lacune non matérialisée dans les manuscrits mais voir 33*.33cd-34cd : प्रोक्षणीपात्रमादाय पूरयेदुदकेन तु। विसृज्य कूर्चं तन्मध्ये न्यस्त्वा प्रादेशमात्रतः॥ अङ्गुष्ठानामिकाभ्यां च त्रिरुत्प्लवनमाचरेत्। Voir aussi *Ajita* 21.93.

३. 15c °ग्राभ्यामु°] A^2, C^1, D^1, G, °ग्राह्यामु° A^1, °ग्राभ्याद्° C^2, D^2, चैव F^1.

४. 16a तेन] A, C^2, D, G, तोयैर् C^1, एन F^1 ; 16b °मन्त्रतः] A, D, F^1, G, °मात्रतः C^2.

५. 16c उद्धृत्य] A, C, D^2, F^1, G, उत्सृज्य D^1.

६. 18a ऊर्ध्वतो] A, F^1, G, ऊर्ध्वाधो C, D.

७. 19.18cd = 33.45cd.

८. 19a °श्रयणं कृत्वा] A, °श्रवणं कुर्यात् C^2, D, F^1, °श्रयणं कुर्यात् C^1, °श्रवणं कृत्वा G.

९. 19c व्यपोह्याङ्गारकान्] A, C^1, D, G, व्यपोह्याङ्गारकाद् C^2, व्यपोह्य कारकान् F^1.

१०. D^1 donne pour 20ab : द्वौ दर्भाग्रबाह्यतोत्पदाग्रौ द्वौ विनिक्षिपेत्। ; D^2 : द्वौ दर्भाग्रावहिद्योदाग्रौ द्वौ विनिक्षिपेत्। F^1 remplace ce demi vers par le texte suivant : दापयेत्स्रुवं पश्चाद्दर्भामृज्यंपुनः पुनः। अग्रमग्रेण सं [lacune].

११. 20a द्वौ दर्भाग्रावभिद्योत्य] C, द्विदर्भमभिद्योत्य (*v.f.*) A^1, द्विदर्भमवभिर्द्योत्य (*v.f.*) G ; 20b द्वौ दर्भाग्रौ विनिक्षिपेत्] C^2, दर्भाग्रं चाग्नि A^1, दर्भाग्रद्वयन् A^2, दा +ग्रौ द्वौ विविक्षिपेत् C^1, दर्भाग्रौ द्वौ G.

१२. 20c हृदिना] A, C^1, D, G, च हृदा C^2, विधिन् (?) F^1 ; 20d अभिद्योतनम्] A^2, D,

[१]ततः पवित्रमादाय पूर्ववच्छुद्धिमाचरेत्[२] ।
विसृज्य ग्रन्थिं संप्रोक्ष्य चाग्निमध्ये विनिक्षिपेत्॥ २१ ॥
[३]तापयेत्तु स्रुवं पश्चाद्दर्भैर्मृज्य पुनः पुनः[४] ।
[५]अग्रमग्रेण संस्पृश्य मूलं मूलेन संस्पृशेत्[६] ॥ २२ ॥
मध्यं मध्येन संस्पृश्य दर्भानग्नौ विनिक्षिपेत्।
[७]परिधिं न्यस्त्वा तत्रैव दक्षिणोत्तरपश्चिमे[८] ॥ २३ ॥
आघारसमिधौ न्यस्त्वा चाग्नेयैशानकोणके[९] ।
[१०] परिषेचनं ततः कृत्वा ह्यदितेन्वादिमन्त्रतः[११] ॥ २४ ॥

[५. वास्तुहोमः]

आज्याक्तौ समिधौ हुत्वा ब्रह्मवृक्षसमुद्भवौ[१२] ।
[१३]आघारमाज्यभागं च जुहुयात्तदनन्तरे[१४] ॥ २५ ॥

G, अभद्योदनम् A^1, पुरद्योतनम् C, पुनरोदनम् F^1.

१. F^1 donne la version suivante de 21ab : त्रिरद्धयं समादाय पूर्ववच्छुद्धिमाचरेत्।

२. 21a ततः] C, तिरः A, G, रितः D^1, ऋतः D^2.

३. A, G omettent 22ab-23ab.

४. 22a तापयेत्तु] Eds., दापयेत्तु C, D^2, F^1, स्थापयेत्तु D^1; cf. *Ajita* 21.86-87.

५. 22cd-23a = 33.42cd-43a.

६. 22d मूलं मूलेन संस्पृशेत्] C^1, D, F^1, दर्भानग्नौ विनिक्षिपेत् C^2.

७. F^1 donne la version suivante de 23c : तत्रैव परिधिं चैव.

८. 23c तत्रैव] A^2, D, G, च तत्रैव (*v.f.*) A^1, तु तत्रैव (*v.f.*) C^2 ; 23d °पश्चिमे] A, G, °पश्चिमम् C, D, F^1.

९. 24a आघार°] A, F^1, G, अघोर° C, D ; 24b चाग्नेयैशानकोणके] A, G, एकेन परिषेचनम् C, दौ(?) कोणकेनमन्तरम् (?) D^1, भौ(?) कोणकेन समन्त्रतः D^2, ऐशान्याग्नय कोणके F^1.

१०. C omettent 24cd ; A^2 omet 24cd-25cd.

११. 24c परिषेचनं ततः कृत्वा ? (*v.f.*) ; 24d ह्यदितेन्वादि], A^1(corr.), ह्यतितेन्वाति A^1, G, स्वदितेन्वादि D, अदितेन्यादि F^1 (cf. 33*.46a).

१२. 25a आज्याक्तौ समिधौ] A^1, पूर्वोक्तसमिधौ C, आज्यात्र समिधौ D^1, आज्याक्तसमिधौ D^2, आज्योक्तसमिधान् F^1 ; 25b °भवौ] C^2, °भवाः A^1, °भवाम् C^1, °भवा D, °भवेत् F^1.

१३. A^1 et A^2 remplacent 25cd par une répétition de 24ab : आघारसमिधौ न्यस्त्वा चाग्नेयैशानकोणके।

१४. 25c आघार°] Eds., आधान° C, D, G.

प्रजापतये स्वाहा (१)। इन्द्राय स्वाहा (२)। [१]अग्नये स्वाहा (३)। [२]सोमाय स्वाहा[३](४)।

सद्यादीशानपर्यन्तं दिक्षु मध्ये च होमयेत्।
अहमस्मीति मन्त्रेण चरुं हुत्वा विशेषतः[४] ॥ २६ ॥
वास्तोष्पतेति मन्त्रेण आज्यं हुत्वा विशेषतः[५] ।
वास्तुदेवतानाम्ना तु होमं कुर्याद्घृतेन तु[६] ॥ २७ ॥

